पंचमः स्तबकः प्रारभ्यते

श्रीः॥ग०॥अथ कदाचित् कतिषु चिद्गणरात्रेषु गणनापात्रेषु जातेषु चिरवियुक्तनिजाऽऽत्मजांऽबिकाविरहतपनतापतातप्यमानमनास्तमसहमानस्तामालोकयितुमिव तत्प्रेषिततद्भर्तृवाहनैरिवाऽनडुद्भिर्योजितैरनोभिः सुमनोभिः शक्र इव गोपचक्रेण परिवृतो नंदस्सनंदन स्सानंदं तदीयाऽऽवासवनं पावनं समविंदत॥ १॥

श्रीकृष्णायनमः॥ अथांऽगिरः शापप्रभावलब्धसर्पभावस्य सुदर्शनाऽऽख्यविद्याधरस्योद्धारलीलां वर्णयितुं तदुपोद्घाततया सपुत्रगोपस्य नंदस्यांऽबिकावनगमनमाह॥ अथेत्यादिना गद्येन॥ अथ रासोत्सवानंतरं कतिषुचित् गणरात्रेषु गणरात्रं निशा बह्व्य इत्यमरात् बह्वीषु निशासु गणनापात्रेषु गणनयोग्येषु गणनाधारेषु वा जातेषु सत्सु॥ कतिषुचिद्दिवसेष्वतिक्रांतेषु सत्सु इत्यर्थः॥ योग्यभाजनयोः पात्रमित्यमरः॥ सुमनोभिर्देवैः परिवृतः शक्र इंद्र इव गोपचक्रेण परिवृतः तथा सनंदनः नंदनेन पुत्रेण श्रीकृष्णेन सहितः पक्षे नंदनेन वनेन सहितः नंदः सानंदं यथा तथा॥ तत्प्रेषितेति॥ तयांऽबिकया प्रेषितानि तस्या भर्तुः शंकरस्य यानि वाहनानि तैरिवेत्युत्प्रेक्षा॥ शिवस्य वृषवाहनत्वात्॥ अनडुद्भिर्वृषभैर्योजितैः शकटैः साधनैः पावनं॥ तदीयेति॥ तस्या आंबिकाया इदं तदीयं आवासभूतं यद्वनं तत्समविंदत प्राप्तवान्॥अंबिका-

वनप्राप्तौ फलमाह॥ तामंबिकामालोकयितुं॥ अत्रोत्प्रेक्षितहेतुगर्भं नंदविशेषणद्वयमाह॥ चिरेत्यादि॥ चिरं चिरकालात् वियुक्ता निजाऽऽत्मजा भगवत्प्रादुर्भावसमयाऽवतीर्णमायारूपा निजतनया यांऽबिका तस्या यो विरहः सएव तपनः सूर्यस्तत्संबंधितापेन तातप्यमानमतितापयुक्तं मनो यस्य स तथाविधइव॥ अतएव तं विरहतापं असहमान इव स्थितः॥ १॥

प०॥ अर्चित्वा तामंबिकां कांतमस्या वाग्दैवत्यं तेऽवगाह्याऽथ नीरम्॥ धीरास्तीरे भूसुरादीन् सुभक्त्या रात्रौ सूषुस्तर्पयित्वा वनेऽस्मिन्॥ १॥

अर्चित्वेति॥ अथ धीरास्ते नंदादयः अस्मिन्वने अंबिकावने वाग्दैवत्यं देवतैवदैवत्यं॥ चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्॥ वाक् सरस्वती दैवत्यं देवता यस्य तत् वाग्दैवत्यं सरस्वतीदेवताकं नीरमुदकं सरस्वत्युदकमित्यर्थः॥ अवगाह्य प्रविश्य तत्र स्नात्वेत्यर्थः॥ सुभक्त्या तामंबिकां अस्या अंबिकायाः कांतं महादेवं चार्चित्वा भूसुरादीन् तर्पयित्वा ऽन्नादिना प्रीणयित्वा रात्रौ तीरे सरस्वतीतटे सूषुः सुखेन वसंतिस्म॥ शालिनी वृत्तं॥ शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैरिति तल्लक्षणात्॥ १॥

ग०॥ततस्तस्या स्सान्निध्यान्मन इव वनमपि तमस्सांद्रमभूत्॥ २॥

ततइति॥ अन्वयः सुगमः॥ ततो निवासाऽनंतरं तस्या अंबिकारूपाया मायायाः॥ तमःसांद्रं तमसा अज्ञानेन पक्षे अंधकारेण सांद्रं निबिडं॥ २॥

प० ॥ तदानीं ॥ मन्नामवाच्यं दयितं निजास्त्रं संत्यज्य दैत्याऽरिरिहाऽस्य सद्म ॥ समागतोऽनेन किलाऽर्थितोऽसौ सुदर्शनाऽऽख्यो गिलति स्म नंदं ॥ ॥ २ ॥

तदानीमिति ॥ तस्मिन्नवसरे ॥ मदिति ॥ सुदर्शनाख्यः सुदर्शनइति आख्या नाम यस्य ससुदर्शनाख्यः शापवशेन सर्पभावमापन्नो विद्याधरो नंदं गिलतिस्म ॥ अत्र हेतुमुत्प्रेक्षते ॥ मन्नामेति ॥ अनेन नंदेनाऽर्थितो द्रोणाऽवस्थायां प्रार्थितः असौ दैत्याऽरिः दयितं प्रियमपि मन्नामवाच्यं मम यन्नाम सुदर्शनेति तद्वाच्यं यन्निजास्त्रं स्वकीयमस्त्रं चक्रं तत्संत्यज्य इह लोके अस्य नंदस्य सद्म गृहं समागतः संप्राप्त इति हेतोः किलेति संभावनायां ॥ यद्येतदस्त्रं भगवद्धस्तस्थं स्यात्तदा दैत्यवधादौ तत्प्रसंगेन कदाचिन्मत्स्मरणे तावन्मात्रेणैव मदुद्धारो जातः स्यात्परंत्विदानीं स्वास्त्रं विहायाऽत्राऽऽगत इति मत्स्मरणोद्बोधकाऽभावात् मदुद्धारो दुर्घटः ॥ एतच्चैतत्प्रार्थनयैव जातमितीर्ष्ययेव नंदं गिलतिस्मेति भावः ॥ उपजाति वृत्तं ॥ २ ॥

ग० ॥ तदोदग्रगरलाऽत्युग्रकाद्रवेयग्रस्तविग्रहो व्रजपरिग्रह स्संसृतिसर्पगिलितो मुमुक्षुरिव वीशपत्रं निजपुत्रं कृष्णकृष्णेति तत्र बव्हार्तमुच्चैश्चुक्रोश ॥ ३ ॥

तदेति ॥ तदा तस्मिन् गिलनसमये तत्राऽंबिकावने ॥ उदग्रेति ॥ उदग्रमतिशयितं यद्गरलं विषं तेनाऽत्युग्रोऽतिक्रूरो यः काद्रवेयः

सर्पः तेन ग्रस्तो गिलितो विग्रहो देहो यस्य स तथाविधो व्रजपरिग्रहः व्रजः परिग्रहः परिजनो यस्य स व्रजपरिग्रहोव्रजपति नंदः॥ पत्नीपरिजनाऽऽदानमूलशापाः परिग्रहा इत्यमरः॥वीशपत्रं वीनां पक्षिणामीशो गरुडः स पत्रं वाहनं यस्य स तथाविधस्तं॥ एतेन सर्पभयनिवृत्तेः सौलभ्यं सूचितं ॥ पत्रं वाहनपक्षयोरित्यमरः ॥ निजपुत्रं कृष्णकृष्णेति बव्हार्तं यथा तथा उच्चैश्चुक्रोश ॥ कृष्णेतीत्यत्र अप्लुतवदुपस्थितइत्यप्लुतवद्भावात्संधिः ॥ क इव ॥ संसृतिसर्पगिलितः संसारसर्पग्रस्तो मुमुक्षुरिव ॥ संसाराख्यसर्पनाशनार्थं मुमुक्षुर्गरुडवाहनं श्रीकृष्णं यथाऽऽह्वयति तद्वन्नंदोऽपि आत्मनो मुमोचयिषया प्रकृतसर्पनाशनार्थं तमाजुहावेत्यर्थः ॥ ३ ॥

प० ॥ तच्छ्रुत्वोल्मुकहस्ता गोपा जघ्नुर्भुजंगमं तैस्तु ॥ नो पस्पृशुर्भिया किं तानि च मित्राशनं विचार्याऽथ ॥ ३ ॥

तच्छ्रुत्वेति ॥ अथ गोपाः तत् नंदाऽऽक्रंदनं श्रुत्वा उल्मुकहस्ता उल्मुकानि अलातानि हस्तेषु येषां ते तथाविधाः संतः तैरुल्मुकैर्भुजंगमं जघ्नुस्ताडयंतिस्म ॥ तु परंतु तानि च उल्मुकानि भिया भयेन किमित्युत्प्रेक्षायां तं भुजंगमं नो पस्पृशुः तत्स्पर्शनमपि न चक्रुः ॥ अनेन ताडनदाहनजन्यप्राणवियोगाऽनुकूलव्यथाकरणं तु दूरापास्तमिति सूचितं ॥ भये कारणभूतं विचारमाह ॥ मित्रेति ॥मित्रं वायुमश्नातीति मित्राशनस्तं विचार्य ॥ उल्मुकानामग्निरूपत्वाद्वायोश्चाऽग्निमित्रत्वात्सर्पाणां च वाताशनत्वादियमुक्तिः॥ प्रबलमप्यस्मन्मित्रभूतं वायुमशितुं समर्थोऽयमस्मानप्यश्नीयात्

इति विचारजन्यया भीत्येव तच्छरीरस्पर्शमपि तत्यजुरिति भावः गीतिरार्यावृत्तं ॥ ३ ॥

ग० ॥ ततश्चक्राऽऽयुधचरणसंस्पृष्टवर्ष्मा मन्नाम वाच्यमनिशमेतत्करस्पृष्टं नैतदिति तदुत्सृज्य धृतस्वनामाऽनुरूपस्वरूपस्तेन पृच्छ्यमानः स सबहुमानमेवमवादीत्॥ ४॥

ततइति ॥ ततः ॥ चक्रेति ॥ चक्राऽयुधस्य श्रीकृष्णस्य चरणेन सम्यक् स्पृष्टं वर्ष्म देहो यस्य स तथाविधः ॥ स्पर्शे सम्यक्त्वं चोद्धारप्रयोजकत्वरूपं ॥ स सर्पः ॥ मदिति॥ मम यन्नाम सुदर्शनेति तद्वाच्यं चक्रं अनिशं निरंतरं एतत्करस्पृष्टं भगवद्धस्तास्थितमित्यर्थः ॥ एतेन मदीयं सर्पशरीरं तु भगवता करेण न स्पृष्टं किंतु चरणेन इति विचार्यैव तत् सर्पशरीरं त्यक्त्वा ॥ धृतेति॥ धृतं स्वनामाऽनुरूपं सुदर्शनेति स्वनामाऽनुगुणमर्थात्सुष्ठु दर्शनं यस्येत्येवंविधं स्वरूपं येन स तथाविधः ॥ मन्नामवाच्यस्य सुदर्शनस्य करधृतत्वेनाऽनुग्रहपात्रत्वं एतत्सर्पवपुषस्तु चरणस्पर्शतिरस्कृतत्वेनाऽननुग्राह्यत्वं इति विचार्य तत् शरीरं हित्वा पूर्वरूपं धृतवानिति भावः ॥ लोकेऽप्यनुग्रहपात्रस्याऽनेनाऽयं करेधृत इति व्यवहारः यस्तथा न तस्य तु पादप्रहारेण दूरीकृत इति व्यवहारोऽस्ति ॥ तेन श्रीकृष्णेन पृच्छ्यमानः कृतप्रश्नः सबहुमानं यथा स्यात् तथा एवं वक्ष्यमाणप्रकारेण अवादीत् ॥ ४ ॥

प० ॥ नाम्ना शरीरेण तवाऽस्त्रसाम्यं त्व्यासीत्पुरा मय्यपि किं ब्रवीमि ॥ तद्वा ऋषेर्भीतिकरं किलाऽहं तद्भीतितोऽगां तु दशामिमां द्राक्॥ ४॥

तदाह ॥ नाम्नेति ॥ अयि श्रीकृष्ण किं ब्रवीमि पुरा पूर्वं मयि नाम्ना सुदर्शनेतिनाम्ना शरीरेण च तव अस्त्रसाम्यं अस्त्रस्य सुदर्शनस्य साम्यं आसीत् ॥ नामसादृश्यं च तुल्यनामतया शरीरसादृश्यं च तेजःसौंदर्यादिमत्वेन बोध्यं॥ मध्ये व्यतिरेको जातइत्याह ॥ तदिति ॥ तत् भवदायुधं सुदर्शनं वै निश्चयेन ऋषेर्भीतिकरं किलेत्यैतिह्ये ॥ ऐतिह्यं च श्रीमद्भागवतेंऽबरीषोपाख्याने दूर्वासास्त्वदस्त्रभीत्या त्रिलोकीभ्रमणं कृतवानिति प्रसिद्धं ॥ अहं तु तद्भीतितस्तस्य ऋषेरंगिरसो भीतितो भयेन द्राग् झटिति इमां सर्परूपापत्तिरूपां दशां अवस्थां अगां प्राप्तोऽभूवम्॥ हि प्रसिद्धं ॥ अत्राऽपि सौंदर्यगर्वेण विरूपानंगिरस उपहसतस्तस्य तच्छापेन सर्परूपप्राप्तिरिति कथाऽनुसंधेया ॥ इंद्रवज्रा वृत्तं ॥ ४ ॥

अधुना तु॥ प० ॥ तव पदनखशशिकांत्या ध्वांतं दुर्विग्रहाऽऽख्यमेतदभूत् ॥ नष्टं नाऽऽश्चर्यं तत्तस्मिन्दिविषन्नदीजननहेतौ ॥ ५ ॥

अधुनेति ॥ इदानीं तु ॥ तवेति ॥ हे कृष्ण तव ॥ पदेति ॥ चरणनखरूपचंद्रकांत्या एतद्दुर्विग्रहाख्यं दुष्टसर्पदेहाऽभिधं ध्वांतं गाढं तमः अथच देहादिकारणभूतमज्ञानं नष्टमभूत् ॥ तत्ध्वांतनाशनं॥ दिविषदिति॥ दिविषन्नद्या गंगाया यज्जननं तद्धेतौ तस्मिन्भवच्चरणनखे आश्चर्यं न अपितु युक्तमेव ॥भवच्चरणनखनिसृता जान्हवी जन्ममरणादिभ्यो मोचयति तदुत्पादकस्य तस्य दुष्टयोनितो मम मोचनं नाश्चर्यकरमिति भावः ॥ गीतिरार्यावृत्तं ॥ ५ ॥

किंबहुना अधमोद्धारकस्य तव ॥ प० ॥ रथांगशस्त्रस्य कृतांतशासनं कृतांऽतकं संविदधे स्वभिख्यया ॥नितांतपापौघवतां त्यजामिलः सतां गतिं प्राप गतांहसां नृपः॥ ६॥

उपसंहरति ॥ किमिति ॥ बहुना बहूक्तेन किं ॥ अधमोद्धारकस्य तव॥ अनयोरुत्तरश्लोकेनाऽन्वयः ॥ रथांगेति॥अधमोद्धारकस्य तथा ॥ रथांगेति ॥ रथांगं चक्रं शस्त्रं यस्य स तथा विधस्तस्य तव स्वभिख्यया शोभनेन नाम्नैव कृतांतशासनं कृतांतस्य यमस्य शासनं कृतांऽतकं कृतः अंतो नाशो यस्य तत्कृतांऽतकं ॥ शैषिकः कप् ॥ सम्यक् विदधे कृतं॥कर्मणि लिट् ॥ एतादृशं मन्नाममाहात्म्यं भवता कथं ज्ञातमित्यत आह ॥ नितांतेति॥ नितांतं अत्यंतं पापौघवंतस्तेषां पापराशीनां पुरुषाणां नृपो राजा अजामिलः नाम्नेत्यत्राऽपि संबध्यते ॥ भवन्नाम्नैव गतांऽहसां गतपापानां सतां गतिं प्राप ॥ भवन्नाम्नोऽपि एतादृशसामर्थ्यसद्भावे साक्षात्तव चरणस्पर्शादेः किं वक्तव्यमिति भावः ॥ वंशस्थं वृत्तं ॥ ॥ ६ ॥

ग०॥एवं कथितजननांतरवृत्तांतं नितांतं नम्रं तं विद्याधरं गदाधर उपरितनतत्सदनगमनाय समाज्ञाप्यैतल्लोकीयं निजभवनं दुःखलवनं स्नेहविका

सिभिर्व्रजवासिभि स्समं समाससाद॥अथ जातु चिद्वृंदावने शंखचूडं॥ ५॥

एवमिति ॥ गदाधरः श्रीकृष्णः एवंपूर्वोक्तप्रकारेण ॥ कथितेति ॥ कथितस्वजन्मांतरीयवृत्तं नितांतमत्यंतं नम्रं तं सुदर्शनाख्यं विद्याधरं उपरितनं तदीयं यत्सदनं स्वर्गस्तं प्रति गमनाय गंतुं समाज्ञाप्य आज्ञां दत्वा स्नेहविकासिभिः स्नेहेन पदाऽऽहतस्य सर्पस्य दिव्यदेहांतरप्राप्त्यादिदर्शजनजनितकृष्णमाहात्म्यज्ञानजन्येन प्रेम्णा विकसंति तच्छीलैर्व्रजवासिभिः समं दुःखलवनं दुःखनाशकं एतल्लोकीयं निजभवनं स्वगृहं प्रति समाससाद प्राप्तः ॥ दुःखलवनमिति विशेषणेन लौकिकभवनसाधारण्यव्यावृत्त्या दुःखाऽसंभिन्नसुखरूपत्वं स्वभवनस्य बोधितं ॥ नन्वेवंसति एतादृशभवनगमने ऽन्येषामनधिकारात् व्रजवासिभिः सममिति साहित्यकथनमसंगतं स्यादितिचेन्न ॥ व्रजवासिनामपि भगवल्लीलोपयोगितया स्वर्णप्रतिमास्थस्वर्णालंकाराणामिव स्वस्वरूपाऽभिन्नत्वेन लीलार्थं तत्साहित्यस्य समंजसत्वात्॥अथ शंखचूडवधलीलां प्रस्तौति ॥ अथेति ॥ अथ सुदर्शनोद्धरणाऽनंतरं ॥ एतेषामुत्तरत्राऽन्वयः ॥ ५ ॥

प० ॥ चंद्राऽभीषुभरप्रकर्षविलसद्रेणूच्चये स्सास्मिते योषित्संघसमावृतः स्सुललितः कृष्णस्तदा गायकः॥ प्राप्तं तत्र धनाऽधिपानुगममुं गोपीहरं सत्वरं ज्ञात्वा शंखधरं क्रुधा मणिधरं कालालयं प्रापयत्॥ ७॥

चंद्रेति॥अथ कदाचित् चंद्रस्य ये अभीषवः किरणास्तेषां भरेण कृत्वा प्रकर्षेण विलसंतः शोभमानायेरेणूच्चयास्तैः सस्मिते स्मितसहितइवेत्युत्प्रेक्षा॥एतेन भगवद्गानस्याऽचेतनवृंदावनस्याऽप्युल्लासदायकतयाऽतिरमणीयत्वं सूचितं॥यद्वा वृंदावनस्याऽलौकिकरूपत्वं सूचितं ॥ कैमुतिकन्यायेन गोपीजनमोहकत्वं च सूचितं ॥ उक्तंचश्रीभागवते ॥ गोप्यस्तद्गीतमाकर्ण्य मूर्छिता नाऽविदन्नृपेति॥ एवंविधे तस्मिन्वृंदावने ॥ योषिदिति ॥ गोपीवृंदसंवेष्टितस्तन्मध्यवर्तीति यावत्॥तथा सुललितः सुष्ठु ललितानि शृंगारचेष्टाविशेषा यस्य स तथाविधः॥तथा॥गायकः गानकर्ता श्रीकृष्णः तदा गानसमये प्राप्तं धनाधिपाऽनुगं कुबेराऽनुचरं अमुं शंखचूडं गोपीहरं तदैव हरणकर्तारं॥तथा॥शंखधरं शंखस्य धरः शंखधरस्तं शंखचूडत्वात्तथाविधं मणिधरं च ज्ञात्वा सत्वरं यथा तथा ॥ एतेन स्वाऽनन्यभक्ताऽपकारकारिणो हनने कालविलंबाऽसहिष्णुत्वं सूचितं ॥ क्रुधा क्रोधेन कालाऽऽलयं मृत्युगृहं प्रापयत् ॥ धनाऽधिपाऽनुचरस्याऽपि सर्वदा शंखधरस्यैव दर्शनेन मणिधारणाऽयोग्यत्वनिश्चयेऽपि इदानीं मणिधरस्य दर्शनेनाऽनेन मणिचौर्यं कृतमिति निश्चित्य स्त्रीहरणरत्नहरणरूपाऽपराधद्वयकारी हंतव्य एवेति विचार्य तं हतवानित्यर्थः ॥ शार्दूलविक्रीडितं वृत्तं ॥ ७ ॥

ग० ॥ तदनु निशामणिसंततिशिरोमणिस्तच्छिरोमणिमादाय रमणीयरमणीजनश्रेणिसेविताय तस्मै द्रुतं स्वाग्रजाय प्रददे॥ ६॥

तदन्विति ॥ तदनु तद्धननाऽनंतरं ॥ निशेति॥निशामणिश्चंद्रस्तस्य

या संततिर्वंशस्तस्याः शिरोमणिरिव निशामणिसंततिशिरोमणिश्चंद्रवंशाऽलंकारभूतः श्रीकृष्णस्तच्छिरोमणिं तस्य शंखचूडस्य शिरःसंबंधिनं मणिं आदाय गृहीत्वा ॥रमणीयेति ॥ स्पष्टं ॥ स्वाग्रजाय स्वज्यायसे तस्मै बलरामाय द्रुतं प्रददे ॥ अनेन स्वपराक्रमलब्धवस्तूनि प्रथमतः स्वगुरुभ्यो देयानीति लौकिकी शिक्षा सूचिता ॥ ६ ॥

प० ॥ हृदयकुमुदमंद्रे कृष्णचंद्रे वनांतं विधृतविरहतापास्तस्य याते स्त्रियस्ताः॥ रुचिरगुणगणांस्तान्कीर्तयंत्योऽथ निन्युर्ह्यमृतभरसदृक्षान् कृच्छ्रतो वासरौघान्॥ ८॥

अथ भगवतो वनगमने सति तद्विरहतप्तानां गोपीनां तद्गुणगानेन वासराऽतिवाहनं वर्णयति ॥ हृदयेति ॥ अथ हृदयमेव कुमुदं तस्य मंद्रे हर्षदातरि ॥ हर्षाऽर्थकमदधातुनिष्पन्नत्वान्मंद्रशब्दस्य ॥ कृष्णचंद्रे कृष्णएव चंद्रस्तस्मिन्वनांतं गोचारणार्थं वनमध्यं प्रति याते सति हि यस्मात्॥विधृतेति॥विशेषेणधृतो विरहतापो याभिस्तास्तथाविधास्ताः स्त्रियो गोप्यस्तस्य श्रीकृष्णस्य तान् प्रसिद्धान् अमृतभरसदृक्षान् अमृतस्य भरेण तुल्यान् रुचिरान् गुणगणान् कीर्तयंत्यः कृच्छ्रतो महता संकटेन वासरौघान् दिवससमूहान् निन्युरतिवाहयामासुः ॥ मालिनी वृत्तं ॥ ८ ॥

वंशिकामुद्दिश्य ताश्चैवं संजगदुः॥ प० ॥ अनंगजनकप्रिया त्वमसि तादृशी तत्क्षमं स्वयं व्रणयुता करोष्यथ तथाविधं मानसम् ॥ परंत्वमृतपूरि

ताऽप्ययि सुवंशजाते तनौ तनोषि गतिहीनतां तदतिचित्रकृद्वंशिके॥ ९॥

वंशिकामिति ॥ ताश्च गोप्यः वंशिकां मुरलीमुद्दिश्य एवं वक्ष्यमाणं संजगदुः उक्तवत्यः ॥ अनंगेति ॥ हे वंशिके यतस्त्वं अनंगजनकप्रिया अनंगस्य कामस्य यो जनकः पिता श्रीकृष्णस्तस्य प्रिया अतस्तादृशी अनंगजनिका असि अथ यतः स्वयं व्रणयुता रंध्रवती अतो मानसमस्मन्मनः तथाविधं व्रणयुतं करोषि तदुभयं क्षमं योग्यं परंतु अयि सुवंशजाते हेउत्तमवंशसंभूते उत्तमवेणूत्पन्ने अथच उत्तमकुलोत्पन्ने त्वं अमृतपूरिता ऽपि श्रीकृष्णाऽधराऽमृतपूर्णाऽपि तनौ सुवंशजाते ऽस्मच्छरीरे गतिहीनतां गतिराहित्यं स्तब्धीभावं तनोषि विस्तारयसि अथच गतिर्ज्ञानं तद्धीनतां अचेतनत्वं तनोषि ॥ गतिः स्त्री मार्गदशयोर्ज्ञाने यात्राऽभ्युपाययोरिति मेदिनीकोशात् ॥ तत् अतिचित्रकृत् अत्याश्चर्यकारि ॥ स्वतोऽमृतपूरितायास्तवाऽस्मच्छरीरस्याऽचेतनत्वकरणमनुचितं प्रत्युत चेतनत्वकरणमेव योग्यं ॥ एवंसति तन्न कृतमित्याश्चर्यमिति भावः ॥ पृथ्वी वृत्तं ॥ जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुरिति तल्लक्षणात् ॥ ९ ॥

कीचककुलसंभूता त्यक्तसुगोत्रा पराऽधरे लुब्धा॥ त्वमसि करोष्यस्मानपि नो चित्रं वंशिके त्वयि सरागे॥ १०॥

कीचकेति ॥ हे सरागे रागैः सहिते सरागे ॥ रागाश्च स्वरसमुदायाः ॥ अथच सरागे सस्नेहे यद्वा भगवदधरसंबंधितांबूलादिरा-

गसहिते ॥ एतेन स्वनिष्ठगुणसंक्रमस्य सुलभत्वं सूचितं ॥ अथवा श्रीकृष्णाऽधररागसहिते चाकचक्यवशात् प्रतिफलितकृष्णाऽधररागे इति यावत् हे वंशिके यतस्त्वं कीचककुलसंभूता कीचका वेणुविशेषास्तेषां यत्कुलं तस्मिन् संभूता तथा त्यक्तः सुगोत्रः उत्तमपर्वतः स्वजनकवंशोत्पत्तिस्थानभूतो यया सा तथा॥ पराऽधरे परस्य परमात्मनः श्रीकृष्णस्य अधरे लुब्धा असि अथच कीचकस्य विराटश्यालस्य कुले संभूता ॥ एतेन त्वद्वंशधरस्याऽतिकामुकत्वात्तद्वंशोद्भूता त्वमपि तथेति सूचितं ॥ अतएव त्यक्तं सुगोत्रं लक्षणया उत्तमकुलाचारो यया सा अतएव परः स्वभर्तुरितरोऽर्थात् जारस्तस्याऽधरे लुब्धा ॥ कीचकोऽपि सुकुलाचारं विहाय सैरंध्र्यधरलुब्धो जात इति प्रसिद्धं ॥ तद्वत्त्वमसि अतः अस्मानपि तथेति शेषः तथा सरागाः त्यक्तसुगोत्राः पराऽधरे लुब्धाश्च करोषि एतत्त्वयि चित्रं न ॥ लोके हि यो यत्स्वभावो भवति स स्वसहचरमपि तथैव करोति ॥ गीतिरार्या वृत्तं ॥ १० ॥

ग० ॥ अथ कलानिधिकुलकलानिधिकलंकायमानः कंसस्स्वेष्टं मिष्टं संपादयितुमरिष्टमपि तं समाव्हयत्॥ ७॥

अथ प्रलंबभंजनलीलावर्णनं प्रस्तौति ॥ अथेति ॥ अथाऽनंतरं ॥ कलानिधीति ॥ कलानिधिश्चंद्रस्तस्य यत्कुलं तदेव कलानिधिश्चंद्रस्तस्मिन् कलंकायमानः कंसः मिष्टं मधुरमपि ॥ वस्तुतस्तु अत्यंताऽभिलषितमिति यावत् स्वेष्टं स्वस्य प्रियं कृष्णाऽपकारकर-

णादि संपादयितुं अरिष्टं फेनिलं अरीठेति भाषाप्रसिद्धं सद्यति-कटुर्भवति ॥ मधुरपदार्थसंपादनार्थं मधुरपदार्थाऽवलंबनमेवोचितं न कटुपदार्थावलंबनं ॥ प्रकृतं तु विपरीतमिति विरोधाभासः ॥ परिहारस्तु ॥ तन्नामानमसुरं समाव्हयत् आकारयति स्म ॥ ७ ॥

प० ॥ वृषध्वजेनाऽस्य पुरा हि सूनुः शरीरहीनः कृत इत्यवेत्य ॥ तं तादृशं कर्तुमसौ वृषाख्यमा ज्ञापयत्तूर्णमहो खल स्सः॥ ११ ॥

वृषेति॥सः असौ खलः कंसः अस्य श्रीकृष्णस्य सूनुः पूत्रः कामः वृषध्वजेन वृषः ध्वजे यस्य स वृषध्वजः शंकरस्तेन शरीरहीनः कृतः दग्धइति यावत्॥इति अवेत्यैव तं कामपितरं श्रीकृष्णं तूर्णं शीघ्रं तादृशं शरीरहीनं कर्तुं वृषाख्यं अरिष्टं आज्ञापयत् अहोआश्चर्यं ॥ यस्य वृषश्चिन्हमात्रं तेनेदृक्कार्यं कृतं साक्षाद्वृषश्चेत् किं नकर्तेति बुध्वा कामपितरं हंतुं वृषरूपमरिष्टं प्रेषितवानिति भावः ॥ उपजातिर्वृत्तं ॥ ११ ॥

ग० ॥ ततोवृषभासुरोव्रजजनवृषभसुतं निहंतुं किल गोकुलमापद्यत ॥ ८ ॥

ततइति ॥ कंसाज्ञानंतरं वृषभासुरः व्रजजनवृषभसुतं व्रजवासिजनेषु वृषभस्य श्रेष्ठस्य नंदस्य सुतं श्रीकृष्णं निहंतुं ॥ किलेति वाक्यालंकारे ॥ गोकुलमापद्यत प्राप्तः ॥ ८ ॥

प०॥ युग्मं॥ कूर्दनैर्मर्दनं कुर्वन् मेदिन्या नर्दनैर्द्रुतं॥ तर्जयन् वर्द्धयन् क्रोधं बलीवर्दवपुर्धरः ॥ १२ ॥ अरिष्टोऽरिष्टमातन्वन् क्लिष्टशिष्टेष्टदं प्रभुम् ॥ प्रा

ऽऽद्रवत्प्रकृतिक्रूरस्तस्मै क्रुध्यन्कृशेतरः ॥ १३ ॥

कूर्दनैरिति ॥ युग्मं ॥ बलीवर्दवपुर्धरः वृषशरीरधारीअतएव कूर्दनैः पादेन भूम्युल्लेखनादिरूपक्रीडाभिः ॥ क्रीडा खेला च कूर्दनमित्यमरात् ॥ मेदिन्याः पृथ्व्याः मर्दनं कुर्वन् भूमिं विदारयन्निति यावत् ॥ नर्दनैस्तज्जातीयशब्दैः द्रुतं तर्जयन् भर्त्सयन् अर्थात् तत्रत्यान् क्रोधं वर्द्धयन् अर्थात् श्रीकृष्णस्य अरिष्टमशुभमातन्वन् आ समंताद्विस्तारयन् प्रकृतिक्रूरः प्रकृत्या स्वभावेन क्रूरः ॥ प्रकृतिर्गुणसाम्ये स्यादमात्यादिस्वभावयोरिति मेदिनीकोशात् ॥ तस्मै श्रीकृष्णाय क्रुध्यन् तं प्रति क्रोधं कुर्वन्॥क्रुधद्रुहेत्यादिना संप्रदानत्वं ॥ कृशेतरः कृशादितरः स्थूलइति यावत् एवंविधः अरिष्टः अरिष्टाऽसुरः ॥ क्लिष्टेति ॥ क्लिष्टाः क्लेशं प्राप्ताः ये शिष्टास्तेषामिष्टं ददातीति तथाविधस्तं प्रभुं श्रीकृष्णं प्राद्रवत् धावति स्म॥ १२॥ ॥ १३ ॥

पुत्रारिवाहन वपुर्निजवीर्यदृप्तो नाम्ना गुणैश्च स मतांतिपद्यते ऽयं ॥ नामैकदेशमधिकप्रियराधिकायास्तातस्य यद्वहति तेन निहंतुमर्हः॥ १४॥

अथाऽरिष्टहननं हेतुसंभावनापूर्वकं वर्णयति ॥ पुत्रारीति ॥ युग्मं ॥ यद्यस्मात् ॥ पुत्रेति ॥ पुत्रस्य कामस्य योऽरिः शत्रुः शंकरस्तस्य यद्वाहनं वृषभस्तद्वद्वपुर्यस्य स तथाविधः॥तथा॥निजेति॥स्वपराक्रमगर्वितः अयमरिष्टः ॥ नाम्नेत्यादि॥नाम्ना अरिष्टेतिनाम्ना गुणैर्हि सत्वादिभिश्च समतां प्रतिपद्यते प्राप्नोति ॥ नामाऽनुरूपगुणो गुणाऽनुरूपनामाचेत्यर्थः ॥ तथा ॥ अधिकेति ॥ अधिकमत्यंतं प्रि-

था या राधिका तस्याः तातस्य पितुर्वृषभानोः नामैकदेशं नाम्न एकदेशं वृषेत्येवंरूपं वहति तेन हेतुना निहंतुं अर्हः योग्योऽस्ति ॥ स्वीयस्य शत्रोरिव तत्परिवारस्याऽपि दर्शने परमक्रोधोदयदर्शनात् स्वपुत्रारेर्वाहनरूपधारकोऽयं हंतव्यः तथा स्वप्रियतमराधिकापितृनामैकदेशधारित्वेन तन्नामखंडकश्चाऽतो हंतव्य एवेति भावः ॥ वसंततिलका वृत्तं ॥ १४ ॥

विचिंत्यैवं वासुदेव स्सासूय स्सुखदः सतां ॥ असुरं त्वसुभिर्हीनमाशुचक्रे क्रुधोदितः ॥ १५ ॥

विचिंत्येति ॥ वासुदेवः श्रीकृष्णः एवं पूर्वोक्तं विचिंत्य यतः सतां साधूनां सुखदः सुखदाता अतः सासूयः अरिष्टविषये सेर्ष्यः सन् क्रुधा क्रोधेन उदितः उदयं प्राप्तः संजातक्रोध इति यावत् अथवा क्रुधा क्रोधेन उदितःप्रेरितः॥क्रोधस्य कामाऽनुजत्वेन मदग्रजकामवैरिवाहनवपुर्धारकोऽयमवश्यं हंतव्य इति तेन प्रेरित इत्यर्थः॥ क्रोधस्य कामाऽनुजत्वं तु कामाऽनुजेन सहसा तउपप्लुताऽक्षा इति भागवते तृतीयस्कंधेस्फुटमुक्तं॥ एवंविधश्च सन् आशु शीघ्रं असुरमरिष्टं असुभिः प्राणैर्हीनं चक्रे मारयति स्मेत्यर्थः ॥ १५ ॥

अरिष्टाऽरिष्टतष्टारं शिष्टास्तुष्टास्तु वृष्टिभिः ॥ वृंदारका स्सुमनसां वृंदावन इहाऽऽकिरन् ॥ १६ ॥

अरिष्टेति ॥ इह समये वृंदावने वृंदारका देवाः तु पुनः शिष्टा नारदादयः संतुष्टाः संतः अरिष्टएवाऽरिष्टमशुभं तस्य तष्टा नाशकस्तं श्रीकृष्णं सुमनसां पुष्पाणां वृष्टिभिः आकिरन् समंततो

व्याप्नुवंति स्मेत्यर्थः ॥ १६ ॥

ततो जातुचित् ॥ मत्स्थानस्य किलाऽभिधां नु वहते दुष्टोऽशुचिर्नित्यदा तत्तातः स च वैपरीत्य विधिना मद्भक्तवर्याऽभिधाम् ॥ ज्ञात्वेदं व्रजनायकः कुचरितं व्योमाऽसुरस्याऽमितं स्वेषां रोधकरं रिपुं पशुमिव क्रूरं तदाऽमारयत् ॥ १७ ॥

अथ व्योमाऽसुरवधलीलां वर्णयति॥ततइति ॥ श्लोकेऽन्वयः ॥ मदिति ॥ ततः अरिष्टहननाऽनंतरं जातुचित् कदाचित् व्रजनायकः श्रीकृष्णः क्रूरं रिपुं व्योमासुरं पशुमिव अमारयत् प्राणांस्त्याजितवान् ॥ यथा यज्ञियः पशुः शस्त्रंविना हन्यते तद्वदेनंहतवानित्यर्थः ॥ तत्र हेतुमुत्प्रेक्षते ॥ अशुचिर्दुष्टो व्योमासुरः मत्स्थानस्य मम स्थानं मत्स्थानं विष्णुदं तस्याऽभिधां व्योमेति नाम नित्यदा वहते धारयति ॥ स च मयनाम्ना प्रसिद्धस्तत्तातस्तस्य व्योमाऽसुरस्य तातः पिता वैपरीत्यविधिना वैपरीत्यकरणेन ॥ मदिति ॥ मम भक्तवर्यो यमस्तस्य या ऽभिधा नाम तां वहते धारयति इदममितं अपरिमितं व्योमाऽसुरस्य कुचरितं कुत्सिताऽऽचरणं ज्ञात्वा नु ज्ञात्वेव ॥ अपराधकारित्वमपि तस्य विशेषणेनाह ॥ स्वेषामिति॥ तदा क्रीडाकाले स्वेषां स्वीयानां गोपानां रोधकरं ॥ तेन हि तत्राऽऽगत्य गुहायां सर्वे गोपा रुद्धा इति श्रीभागवतोक्ता कथाऽत्रानुसंधेया ॥ दुष्टो ऽशुचिरपि मत्स्थाननाम धारयति तथा मत्समीपे एव गोपान् रोधयति तथाविधो यत्तातो मयोऽपि मद्भक्तवर्ययमनाम वर्णतो विपरीतं कृत्वा धारयतीति स्वतः पितृतश्चैत-

स्कुचरितं ज्ञात्वा शीघ्रमेव तं हतवानित्यर्थः ॥ शार्दूलविक्रीडितं वृत्तं ॥ १७ ॥

ग० अथ कदाचिद्विपंचीविपंचोदंचनपंचमादिस्वरप्रपंचांऽचितचेतसो विरंचिसुतस्य वचःश्रवणसंचितक्रोधचयचुंबितमतिस्तदतिविसाराऽरुणेक्षणभ्रमत्कुटिलभ्रुकुटिकरालो द्रोहद्रुमाऽऽलवालंनरादनरपालः कालात्मनि द्रोहमुन्निद्रयितुं कालोपमं केशिनमाहूय गोकुलं प्रेषयामास तदनु तदनुज्ञया दनुज स्स मनुजरूपाय दनुजारये द्रोग्धुं द्रुतं पर्वतोपमार्ववपुर्धरः कठिनतरोद्भटसटोच्चाटितव्योमयाननिकुरंबो व्रजवासिकदंबं भीषयन् व्रजमाजगाम ॥ ९ ॥

अथ केशिदैत्यवधलीलावर्णनमुपक्रमते ॥ अथेति ॥ अथ व्योमवधाऽनंतरं कदाचित् नरादनरपालः नरादानामसुराणां नरपालो राजा कंसः कालोपमं मृत्युसदृशं केशिनं एतन्नामानं कंचिदसुरं आहूय गोकुलं प्रेषयामास ॥ किं कर्तुं ॥ कालात्मनि कालः आत्मा स्वरूपं यस्य तस्मिन् कालस्वरूपे भगवति विषये ॥ कालोऽस्मिलोकक्षयकृत्प्रवृद्ध इति भगवद्गीतासु कालरूपोऽवतीर्णोऽहमिति श्रीभागवतेच कालरूपत्वोक्तेः ॥ द्रोहमुन्निद्रयितुं प्रकटीकर्तुं ॥ अत्र हेतुगर्भाणि विशेषणान्याह ॥ द्रोहएव द्रुमस्तस्याऽऽलवालमावालं ॥ स्यादालवालमावालमित्यमरादजहल्लिंग आलवालशब्दः ॥ द्रोहवृक्षोत्पत्तिस्थानमित्यर्थः ॥ पुनः कीदृशो नरादनरपालः ॥ विपंचीत्यादि ॥ विपंचं विस्तृतं उदंचनं प्रादुर्भावो येषां ते विपंचोदंचना ये पंचमादिस्वराः विपंच्याः सप्ततंत्र्याः संबंधिनो ये विपंचोदंचनपंचमादिस्वरास्तेषां यः प्रपंचो विस्तारस्तेनांऽचितं युक्तं चेतो यस्य तथाविधस्य विरंचिसुतस्य नारदस्य ॥ वचइति ॥ वचसः श्रीकृष्णस्य वसुदेवसुतत्वतत्कृतप्रच्छन्नगोकुलनयनादिरूपगुह्यकथनरूपस्य यत् श्रवणं तेन संचितो यः क्रोधचयः क्रोधसमूहः अत्यंतक्रोध इतियावत् तेन चुंबिता मतिर्बुद्धिर्यस्य सः ॥ तथा ॥ तदिति ॥ तस्य क्रोधस्य योऽतिविसारोऽत्यंतविसरणं तेनाऽरुणे रक्तवर्णे ये ईक्षणे ते च भ्रमंत्यौ कुटिले ये भ्रुकुटी ते च तेचेति द्वंद्वे ताभिः करालो भयंकरः ॥ तदन्विति ॥ तदनु प्रेषणाऽनंतरं स केशिनामा दनुजो दैत्यः तदनुज्ञया कंसाऽनुज्ञाया मनुजरूपाय मनुष्यरूपाय दनुजारये दैत्यारये श्रीकृष्णाय द्रोग्धुं ॥ क्रुधद्रुहेत्यादिना चतुर्थी ॥ व्रजवासिकदंबं व्रजवासिसमूहं भीषयन् सन् द्रुतं व्रजमाजगाम ॥ कीदृशः ॥ पर्वतेति ॥पर्वतोपमं पर्वतसदृशं यदर्ववपुरश्वशरीरं तस्य धरो धारकः ॥ तथा ॥ कठिनेति ॥ कठिनतराः कठोरतरा उद्भटाः क्रूराः सटाः ग्रीवास्थकेशास्ताभिरुच्चाटितमितस्ततः क्षिप्तं व्योमयानानां विमानानां निकुरंबं समूहो येन स तथाविधः ॥ ९ ॥

प० ॥ युग्मं ॥ रंहसाऽहः समाकर्तुमहंकाराऽन्वितो हयः ॥ हंत हंसैस्समाध्येयं हरिं हेषितमुत्स्तजन् ॥ १८ ॥ स वै सद्यस्तमापद्य त्यनवद्यमवद्य

कः॥यथानदी नद्यधीशं तत्करं प्रजगार तं॥१९॥

रंहसेति ॥ युग्मं ॥ अहंकाराऽन्वितः हयः अश्वरूपः अवद्यकः कुत्सितः॥ कुपूयकुत्सिताऽवद्यखेटगर्ह्याऽणकाः समा इत्यमरात्॥स्वार्थेकः ॥ यद्वा अवद्यानां कुत्सितानां कंसादीनां कं सुखं यस्मादेवंविधः॥सः दैत्यः हंत इति खेदे हंसैः परमहंसैर्योगिभिः सम्यक् आ सर्वतो ध्येयं अतएवाऽनवद्यं अवद्यः कुत्सितो न भवतीत्यनवद्य उत्तमस्तं निर्दोषमिति यावत् हरिं अन्वर्थनामानं श्रीकृष्णं प्रति हेषितं हयजातीयशब्दं उत्सृजन् सन् अंहः पापं ॥ कलुषं वृजिनैनोघमंहोदुरितदुष्कृतमित्यमरात् ॥ सम्यक् सर्वतः कर्तुं नद्यधीशं समुद्रं प्रति नदी यथा नदीव रंहसा वेगेन समापद्य प्राप्य तं दैत्यदमनसमर्थत्वेन प्रसिद्धं यद्वा भगवता स्वमुखे दत्तं तत्करं श्रीकृष्णहस्तं सद्योवै तत्कालमेव प्रजगार गिलति स्म ॥ हिप्रसिद्धं ॥ नद्यधीशं नदीवेत्युपमया समुद्राऽऽपेक्षया यथा नद्याअल्पत्वं तथैतस्य भगवदपेक्षया ऽल्पत्वं अपुनरावर्त्तनं च ध्वनितं ॥ १८ ॥ ॥ १९ ॥

गां वरामाहरद्वाजिकंठः पुरा मात्स्यरूपं विनिंद्यं धृतं वै मया॥ तत्प्रलापं प्रमार्ष्टुं प्रभुः स द्रुतं केशिनं प्रापयत्कालगेहं मुदा॥ २०॥

अथ तद्धननमुत्प्रेक्षापूर्वकं वर्णयति ॥ गामिति ॥ प्रभुः समर्थः स श्रीकृष्णः मुदा हर्षेण ॥ एतेन तद्धनने आयासाऽभावः सूचितः ॥ केशिनं हयरूपमेतन्नामानं दैत्यं कालगेहं मृत्युगृहं प्रापयत् ॥ अत्र फलमुत्प्रेक्षते ॥ गामित्यादिना ॥ पुरा पूर्वं वाजिकंठः हयग्रीवाख्योऽसुरः वरां श्रेष्ठां गां वेदरूपां वाणीं आहरत् हृतवान् ॥ तदा मया विनिंद्यं विशेषेण निंद्यं मात्स्यरूपं मत्स्यसंबंधिरूपं धृतं ॥ तत्प्रलापं सः कुत्सितमेतद्भगवता रूपं धृतमित्याकारकोयः प्रलापस्तं प्रमार्ष्टुं दूरीकर्तुमिवेति गम्योत्प्रेक्षा॥ यस्यग्रीवामात्रं हयसंबंधि तस्य हननार्थं निंद्यमेतन्मत्स्यरूपं धृतमिति लोकप्रवादनिराकरणार्थं सर्वाऽयवाऽवच्छेदेन हयरूपमेनं रूपांतराऽनालंबेनैव हतवानित्यर्थः ॥ स्रग्विणी वृत्तं ॥ रैश्चतुर्भिर्युता स्रग्विणी संमतेति तल्लक्षणात् ॥ २० ॥

तदानीं॥ वृंदारका वृंदशस्ते ऽमंदमंदारसंचितैः ॥ सुमैरवाकिरन् कृष्णं केशिकृंतनकृत्प्रभुम्॥ २१ ॥

तदानीमिति ॥ हननसमये॥ वृंदारकाइति ॥ ते प्रसिद्धाः वृंदारका देवाः ॥ केशीति ॥ केशिनो दानवस्य यत्कृंतनं तत्करोतीति केशिकृंतनकृत् स चाऽसौ प्रभुः समर्थश्च तथाविधं श्रीकृष्णं ॥ अमंदेति ॥ अमंदान्यनल्पानि च तानि मंदारेभ्यः कल्पवृक्षेभ्यःसंचितानि संगृहीतानि चेतिविशेषणोभयपदः कर्मधारयः ॥ तैस्तथाविधैः सुमैः पुष्पैः वृंदशः संघशः अवाकिरन् ववृषुः ॥ २१ ॥

अथ कदाचित्पुरा खलु ॥ रेतसा कर्मणा नाम्ना यस्मादुग्रस्त्रिलोचनः ॥ उग्रसेनाऽऽत्मजायाऽदाद्धनुरुग्रं दयाऽन्वितः॥ २२॥

अथ धनुर्यागमिषेण कृष्णाऽऽनयनार्थं कंसाऽऽज्ञयाऽक्रूरस्य गोकुलाऽऽगमनं पुनः श्रीकृष्णसहितस्य तस्य मथुराप्रवेशादिकं च वर्णयितुमुपक्रममाणो यागोद्देश्यभूतधनुःप्राप्तिं वर्णयति ॥ अथे-

ति ॥ अथेत्यारंभे ॥ कदाचित् पुरा खलु ॥ एषामुत्तरत्रान्वयः ॥ रेतसेति ॥ पुरा खलु कदाचित् त्रिलोचनः शंकरः दयान्वितः सन् यस्माद्धेतोः रेतसा वीर्येणोग्रः उग्ररेताइति यावत् ॥ तथा ॥ कर्मणाऽपि उग्रः उग्रकर्मेति यावत् ॥ संहारकर्तृत्वात् ॥ नाम्नाऽपि उग्रः अस्ति ॥ उग्रः कपर्दी श्रीकंठ इत्यभिधानात् ॥ तस्माद्धेतोः उग्रसेनात्मजाय कंसाय उग्रं क्रूरं धनुरददात् ददाति स्म॥योहि शांतः स शांतमेव दानं शांताय ददाति यश्चोग्रः स उग्रायोग्रमेव दानं ददातीति रीत्या शंकरः स्वतः प्रकारत्रयेणोग्र उग्रसेनात्मजायोग्रं धनुर्दत्तवानिति भावः ॥ २२ ॥

यःकिल॥कपालखेभौ च गरं स्ववाहे घंटाप्रघोषं प्रदधत्प्रजेशः॥धर्त्तुं तथा पांचमधर्ममीशस्तपःप्रयासं प्रथयन् सदाऽऽस्ते॥ २३॥

प्रासंगिकं शंकरवर्णनं करोति ॥ यः किलेति॥ श्लोकेऽन्वयः ॥ शंकरस्य सर्वदा तपश्चरणमुत्प्रेक्षापूर्वकं वर्णयति ॥ कपालेति ॥ यः प्रजेशः प्रजानामीशः प्रजेशः एवंविधोऽपि ईशः शंकरः ॥ एतेनैतादृशैश्वर्यवतस्तस्य तपसा न किमपि साधनीयमिति सूचितं सदा सर्वदा तपःप्रयासं तपसि विषये प्रयासं प्रथयन्सन्नास्ते ॥ किलेति प्रसिद्धौ ॥ अत्रोत्प्रेक्षते ॥ कपालेत्यादि ॥ कपालखेभौ खे आकाशे भातीति खेभश्चंद्रः ॥ तत्पुरुषेकृतीतिसप्तम्यलुक् ॥ कपालंच खेभश्च कपालखेभौ च परं गरं विषं च परं स्ववाहे वृषभे घंटाप्रघोषं घंटायाः प्रकृष्टं घोषं प्रदधदपि ॥ कवर्गसंबंधिवर्णचतुष्टयाद्यान् कपालखेभगरलघंटाप्रघोषान् धारयन्नपीत्य-

र्थः ॥ तथा ॥ पूर्वोक्तप्रक्रमेण पांचमधर्मं पंचमो ङकारस्तत्संबंधिनं धर्मं ङकारादि धर्मं विशेषणं धर्तुमिवेति गम्योत्प्रेक्षा ॥ ङकारादेर्धर्मस्याऽतिदुर्लभत्वात्तल्लब्धये ऽद्यापि तपश्चरतीति भावः ॥ उपजातिर्वृत्तं ॥ २३ ॥

किंच ॥ नगजाननशिशिरांशुप्रेक्षणसंमोदनिर्भरोऽपिसदा ॥ स गजाननशिशिरांशुप्रेक्षणसंमोदनिर्भरोऽस्ति किल ॥ २४॥

किंचेति ॥ नगजाननेति ॥ किंच यः सदा गजाननो गणेश एव शिशिरांशुश्चंद्रस्तस्य यत्प्रेक्षणमवलोकनं यद्वा गजाननो गणेशः शिशिरांशुः शिरोगतश्चंद्रश्च तयोर्यत्प्रेक्षणं तेन यः संमोदो हर्षस्तेन निर्भरः पूर्णः स न भवतीति नगजानशिशिरांशुप्रेक्षणसंमोदनिर्भरः एवंविधोऽपि सः गजाननशिशिरांशुप्रेक्षणसंमोदनिर्भरः अस्ति किलेतिविरोधाभासः ॥ परिहारस्तु नगाज्जाता नगजा पार्वती तस्या आननमेव शिशिरांशुश्चंद्रस्तस्य प्रेक्षणेत्यादि पूर्ववदिति ॥ गीतिरार्या वृत्तं ॥ २४ ॥

ग० ॥ इत्थंभूतस्य भूतयूथभूपस्य सर्वभूतभयदस्य तस्य शरासनस्य पराशनस्य नराशनः क्रतुं कर्तुं निजमृत्युभयमुद्धर्तुमुपक्रमं प्रचक्रे ॥ १० ॥

इत्थमिति॥नराशनः कंसः इत्थंभूतस्य पूर्वोक्तं प्रकारं प्राप्तस्य ॥भूतेति॥भूतानां पिशाचानां यद्यूथं समुदायस्तस्य भूपो राजा तस्य भूतनाथस्य शंकरस्य संबंधिनः॥ सर्वेति॥सर्वेषां भूतानां भयदस्य पराशनस्य परान् शत्रूनश्नातीति पराशनं तस्य शत्रुनाशकस्य श-

रासनस्य धनुषः क्रतुं यागं कर्तुं ॥ निजेति ॥ निजं स्वीयं यन्मृत्युभयं तच्च उद्धर्तुं दूरीकर्तुं उपक्रमं प्रचक्रे कृतवान् ॥ १० ॥

प० ॥ पंकोद्भवं पद्ममिदं प्रसिद्धं लोके परं चित्र
तरं यदासीत् ॥ कंसस्य तस्मिन् हृदयाब्जकोशे
पंकप्रवृद्धिर्विपुलाऽप्यदृश्ये ॥ २५ ॥

पंकोद्भवमिति ॥ पद्मं पंकोद्भवं पंकात्कर्दमादुद्भवो यस्य तत्पंकोद्भवं लोके प्रसिद्धं ॥ इदं परं चित्रं ॥ इदं किं ॥ कंसस्य तस्मिन् अदृश्येऽपि हृदयाऽब्जकोशे विपुला पंकप्रवृद्धिः आसीत् इति यत्तत् ॥ पंके पद्मकोशोत्पत्तिर्दृष्टा परंतु पद्मकोशे पंकोत्पत्तिराश्चर्यकारिणी ॥ वस्तुतस्तु कंसस्य हृदयाऽब्जकोशे धनुर्यागमिषेण श्रीकृष्णाऽपकारकरणवांच्छोदयेन पापवृद्धिरभूदित्यर्थः ॥ अस्त्रीपंकंपुमान्पाप्मेत्यमरः ॥ इंद्रवज्रा वृत्तं ॥ २५॥

ग० ॥ ततः क्रूरतरः क्रव्याद्चक्रचक्रवर्ती निसर्ग
वक्रः क्रूरकर्मणि नियोजयितुं तमक्रूरमप्याकार
यितुं तानाज्ञापयां चक्रे ॥ ११ ॥

ततइति ॥ ततः क्रूरतरः अत्यंतंक्रूरः निसर्गवक्रः स्वाभाविकवक्रताशाली ॥ क्रव्यादेति ॥ क्रव्यादानामसुराणां यच्चक्रं समूहस्तस्य चक्रवर्ती राजा कंसस्तं अक्रूरमपि नक्रूरोऽक्रूर इत्यन्वर्थनामानमपि क्रूरकर्मणि मारणार्थं गोकुलात् कृष्णानयनादिरूपे नियोजयितुं आकारयितुं तान् क्रव्यादान् आज्ञापयांचक्रे आज्ञप्तवान् ॥ ११ ॥

प० ॥ दूतैस्समाहूतमिहाऽऽह्वकार्यं कार्यं समाज्ञा
प्य स वांच्छितं स्वं ॥ आकूतगर्भं पुरुहूतशत्रुर्विवे
श गेहं स च नैजमाशु ॥ २६ ॥

दूतैरिति ॥ पुरुहूतशत्रुरिंद्रशत्रुर्दैत्यः स कंसः दूतैरिह सभायामाहूतमाकारितं आह्वकार्यं आह्वकश्रेष्ठमक्रूरं प्रति आकूतगर्भं धनुर्यागमिषेण कृष्णमत्राऽऽनीय घातयामीत्यभिप्रायगर्भं वांच्छितंस्वंकार्यं कृष्णानयनरूपं समाज्ञाप्य नैजं स्वकीयं गेहं गृह माशु विवेश ॥ सच अक्रूरोऽपि निजं गृहं विवेशेत्यनुषंगः ॥ उपजातिर्वृत्तं ॥ २६ ॥

अथ ॥ दिनकरेऽप्युदयाऽचलसानुतः प्रचलिते
चलितः किल चिंतयन् ॥ सुललितं कलितं शुभ
लक्ष्मभिः पदमसौ ननु शौरिसुतस्य तत् ॥ २७ ॥

अथेति ॥ कंसाऽऽज्ञानंतरं ॥दिनकरेइति॥ असौ अक्रूरः उदयाचलसानुतः उदयाचलशिखरात् दिनकरेऽपि सूर्येऽपि प्रचलिते सति सूर्योदयानंतरमित्यर्थः ॥ ननु संभ्रमे ॥ कृष्णदर्शनं मम भविष्यतीति संभ्रमेण चलितः आसीत् इति शेषः ॥ किं कुर्वन्॥ सुललितं सुतरामत्यंतं ललितमीप्सितं ॥ ललितंत्रिषु ॥ ललिते चेप्सितेऽपि स्यादिति मेदिनीकोशात् ॥ तथा ॥ शुभलक्ष्मभिः सामुद्रिकोक्तैः शुभचिन्हैः कलितं युक्तं ॥ एतादृशं शौरिसुतस्य श्रीकृष्णस्य तत् योगिध्येयत्वेन प्रसिद्धं पदं चरणं चिंतयन् किल निश्चये द्रुतविलंबितं वृत्तं ॥ २७ ॥

तदाऽध्वनि॥मृगांकवंशाऽब्धिमृगांक इच्छन् मृगांकपादं त्वयते विमृग्यम्॥ निजांकगं कर्तुमितीव शौरेः प्रदक्षिणं चेरुरहो मृगास्तम्॥ २८॥

अथाऽक्रूरस्य पथि प्रदक्षिणमृगगमनरूपं सुशकुनमुत्प्रेक्षापूर्वकं वर्णयति ॥ तदेत्यादि ॥ मृगांकेति ॥ तदा मृगाः पशवोऽपि तं अध्वनि पथि गच्छंतमक्रूरं प्रदक्षिणं यथा स्यात् तथा चेरुः गच्छंतिस्म ॥ अहो आश्चर्ये ॥ अत्रोत्प्रेक्षते ॥ मृगांकवंशेति ॥ मृगांकश्चंद्रस्तस्य यो वंशः स एवाऽब्धिः समुद्रस्तस्य मृगांक इव चंद्र इवेति मृगांकवंशाऽब्धिमृगांकः अक्रूरः विमृग्यं विशेषेण मृग्यं योगिभिरप्यन्वेषणीयं शौरेः श्रीकृष्णस्य मृगांकपादं मृगांकश्चंद्रस्तद्विशिष्टं पादं चरणं ॥ अष्टादशसामुद्रिकलक्षणमध्ये चंद्रस्याऽपि सत्वात्॥तं निजांऽकगं संवाहनार्थं निजोत्संगगतं अथवा निजसमीपगतं कर्तुं इच्छन् सन् अयते गच्छति इतीव इति विचार्यैव हि निश्चयेन अस्मत्कुलकूटस्थमृगधारकवंशोल्लासकोऽयं तादृशमृगधारकचंद्रलक्षितं भगवच्चरणं द्रष्टुं गच्छतीति हर्षादिव मृगाः प्रदक्षिणं गच्छंति स्मेत्यर्थः ॥ उपेंद्रवज्रा वृत्तं ॥ २८ ॥

आनंदितेन मनसा मंदिताऽधिस्सुधीस्तदा॥गांदिनीनंदनः शीघ्रं स्यंदनेन ययौ व्रजम्॥ २९॥

आनंदितेनेति ॥ तदा गमनसमये यतः सुधीः सुष्ठु भगवन्माहात्म्यविषयत्वेनोत्तमा धीर्यस्य स सुधीः भगवन्माहात्म्यज्ञानवान् अतएव मंदिताऽऽधिः मंदिताः आधयो मनोव्यथा येन स मंदिताधिः ॥ अनेनाऽऽनीतेऽपि श्रीकृष्णे कंसकर्तृकतदपकारादिचिंताऽभावः सूचितः ॥ अतएव आनंदितेन संजाताऽऽनंदेन मनसा उपलक्षितः गांदिनीनंदनोऽक्रूरः स्यंदनेन रथेन साधनेन शीघ्रं व्रजं ययौ ॥ २९ ॥

ग० ॥ तदनु निचिकीनिचयचरणप्रचरणसंदलितमेदिनीप्रोज्जृंभमाणपरागनिरवग्रहप्रसारधूसरितदिगंतरे ऽगणितगोष्पदचंद्रकिते तद्रोमंथफेनशकलशबलतया तिरस्कृतमुक्ताफलनिकुरंबे दोहनाऽवसरदुग्धाऽऽसारप्रस्तपात्ररवन्यक्कृतविपंचिकोदंचितप्रक्वाणे तद्धुंकृतिनिर्घोषघोषितघोषदिक्संघे समस्तगोपतिगोव्रजविराजमानेऽप्यस्तगोपतिगोव्रजे निजश्रीनिर्जितश्रीगोकुले श्रीगोकुले ॥ ॥ १२ ॥

तदन्विति ॥ अत्रत्यस्य तदनु इत्यस्य श्रीगोकुले इति सप्तम्यंतस्य चोत्तरश्लोकेऽन्वयः ॥ कीदृशे श्रीगोकुले ॥ निचिकीति॥ निचिकीनामुत्तमगवीनां यो निचयः समूहस्तस्य ये चरणास्तेषां यत्प्रचरणं सायमागमनकालिकः संचारस्तेन संदलिता विशीर्णा या मेदिनी तस्याः सकाशात्प्रोज्जृंभमाणो विकसन् उत्पतन्निति यावत् एवंविधो यः परागो रेणुस्तस्य निरवग्रहो ऽप्रतिबंधो यः प्रसारः प्रसरणं तेन धूसरितानि दिगंतराणि यस्मिंस्तत्तथाविधे ॥ नैचिकी गौरुत्तमा तु निचिकी सा प्रकीर्तितेति नाममाला॥अतएव ॥ अगणितेति ॥ अगणितान्यसंख्यातानि यानि गवां पदानि तैश्चंद्रकिते संजाततच्चिन्हरूपचंद्रके॥ तथा ॥ तदिति ॥ तासां ग-

वांरोमंथसंबंधी यः फेनः तस्य शकलैः खंडैः शबलं मिश्रं तस्य भावस्तत्ता तया ॥तिरस्कृतेति॥ तिरस्कृतोमुक्ताफलनिकुरंबो मौक्तिकसमूहो येनतत्तथाविधे॥तथा॥दोहनेति॥दोहनाऽवसरे दुग्धस्य ये आसारा धारासंपाताः ॥ धारासंपात आसार इत्यमरात्॥तेभ्यः प्रसृता ये पात्ररवा दोहनपात्रसंबंधिन आघाताख्यसंयोगजन्या ध्वनयस्तैर्न्यक्कृताः स्वरमाधुर्येण तिरस्कृताः विपंचिकायाः सप्ततंत्र्याः सकाशादुदंचिता उत्पन्नाः प्रक्कणा ध्वनयो येन तत्तस्मिन्॥ तथा ॥ तद्धुंकृतीति ॥ तासां गवां हुंकृतिनिर्घोषास्तैर्घोषितः संजातघोषो घोषस्य व्रजस्य संबंधी दिक्संघो यस्मिंस्तथाविधे॥तथा॥समस्तेति॥समस्ता गोपतयोगोपा वृषभा वा गोव्रजा गोसमूहाश्च तैर्विराजमानेऽपि॥ अस्तेति ॥ अस्ता निरस्ता गोपतिगोव्रजा यस्मादिति विरोधाभासः ॥ परिहारस्तु अस्ता अवसिता गोपतेः सूर्यस्य गोव्रजाः किरणसमूहाः यस्मिंस्तथाविधे इति ॥ अनेन सूर्यास्तसमये ऽक्रूरागमनं सूचितं ॥ तथा ॥निजेति ॥ निजा स्वसंबंधिनी या श्रीः शोभा तया निर्जिते श्रीर्लक्ष्मीर्गोकुलं वाकसमूहश्च ते येन तथाविधे ॥ एतच्छोभां दृष्ट्वा साक्षाल्लक्ष्मी र्मैश्वर्यमेतदग्रे किमपि नाऽस्तीत्यवधार्य सर्वदा अत्राऽऽगत्य स्थिता ॥ अयमेव श्रीविजयः ॥ वाक्कुलजयस्तु एतच्छोभावर्णनाऽसमर्थत्वरूपो बोध्यः ॥ १२ ॥

प० ॥ मल्लिकासुममध्यस्थमिलिंद इव नंदजः ॥
बल्लवार्भकमल्लानां शुशुभे हल्लकेक्षणः ॥ ३० ॥

मल्लिकेति ॥ पूर्वोक्तविशेषणविशिष्टे श्रीकुले हल्लकेक्षणः हल्लके

इव रक्तसंध्यके कमले इव ईक्षणे यस्य स तथाविधो नंदजः श्रीकृष्णः बल्लवाऽर्भकमल्लानां बल्लवार्भका एव मल्ला बलवंतस्तेषां ॥ यद्वा बल्लवाऽर्भकमल्ला बल्लवार्भकश्रेष्ठास्तेषां ॥ उत्तरपदस्थो मल्लशब्दः श्रेष्ठवाची ॥ मध्ये इति शेषः ॥ शुशुभे ॥ कइव ॥ मल्लिकेति ॥ मल्लिकाकुसुमानां मल्लिकापुष्पाणां मध्ये तिष्ठतीत्येवंविधो यो मिलिंदो भ्रमरः स इव ॥ बल्लवार्भकाणां गौरत्वात् कृष्णस्य श्यामत्वादेवमुपमा ॥ ३० ॥

संस्तृतिचित्रमयूखोच्चैःपरितापः प्रशांततामागात् ॥ स्नेहाऽमृतपरिपूरितकृष्णजलददर्शनेन तस्य तदा ॥ ३१ ॥

संसृतीति ॥ तस्य अक्रूरस्य ॥ स्नेहेति ॥ स्नेहः प्रेमैवाऽमृतं तेन परिपूरितः परिपूर्णो यः कृष्णएव जलदो मेघस्तस्य दर्शनेन तदा दर्शनसमयएव ॥ संसृतीति ॥ संसार एव चित्रमयूखोऽग्निः सूर्यो वा तत्संबंधी उच्चैरतिशयितो यः परितापः प्रकर्षेण शांततां आगात् ॥ सजलजलददर्शनेन तापशांतिर्भवतीति प्रसिद्धं ॥ ३१ ॥

एकांगयोगेन भवोत्थपीडा लोकेप्रसिद्धा किमु तद्विचार्य ॥ शतांगयोगं सविहाय पादौ जग्राह चक्रे च हरेः प्रणामान् ॥ ३२ ॥

एकांगयोगेनेति ॥ सः अक्रूरः शतांगयोगं शतांगः स्यंदनो रथ इत्यमराच्छतांगो रथस्तस्य यो योगः संबंधस्तं विहाय त्यक्त्वा रथादवतीर्येत्यर्थः ॥ अथच शतमंगानि शरीराणि तेषां योगं विहाय हरेः पादौ जग्राह प्रणामांश्च चक्रे ॥ अत्रोत्प्रेक्षते ॥ एकेति ॥ ए-

कस्याप्यंगस्य शरीरस्य योगेन संबंधेन भवोत्थपीडा संसारजन्य-बाधा लोके प्रसिद्धास्ति तद्विचार्य किमु ॥ एकशरीरसंबंधात् संसृतिबंधो लोके प्रसिद्धः ॥ शतांगयोगे तु किमुवक्तव्यं तस्मात्संसारनिवृत्तिर्भगवच्चरणस्पर्शादेव भविष्यतीति विचार्यैवेत्यर्थः ॥ एतादृशदुःखहारकत्वादेव हरिरित्युक्तं ॥ उपजातिर्वृत्तं ॥ ३२ ॥

ग० ॥ ततस्तावतिभक्तिरसप्रसररसिकाशयं शयद्वयेनसंमोदोदयस्रुतनयनसलिलसेकनिस्सीमसमुद्रिक्तस्नेहाऽकूरैरिव विपुलपुलकैराकुलितंतमन्वर्थनामानं पितृव्यं भ्रातृव्यौ परिषस्वजाते ॥ १३॥

ततइति ॥ ततस्तदनंतरं भ्रातृव्यौ अक्रूरभ्रातुःपुत्रौ तौ रामकृष्णौ पितृव्यं तमक्रूरं शयद्वयेन हस्तद्वयेन परिषस्वजाते आलिंगितवंतौ॥ कीदृशं पितृव्यं ॥ अतीति॥ अतिशयितो भक्तिरसस्य प्रसरः प्रादुर्भावस्तेन रसिकआशयोंऽतःकरणं यस्य तं॥आशयो मानसाऽऽधारयोरपीति कोशात् ॥ तथा ॥ संमोदेति॥ संमोदस्य हर्षस्य य उदयस्तेन हेतुना स्रुतं गलितं यन्नयनसलिलं तस्य सेकेन निःसीमं यथातथा समुद्रिक्ताः प्रवृद्धाः स्नेहस्य प्रेम्णोंकूरास्तैरिवेत्युत्प्रेक्षा अंकुरों ऽकूर एव चेतिद्विरूपकोशः॥विपुलपुलकैः आकुलितं व्याप्तं ॥ तथा ॥ अन्वर्थनामानं अन्वर्थं न क्रूरो ऽक्रूर इत्यनुगतार्थं नाम यस्य तं सत्वगुणविशिष्टमिति यावत्॥ अतएव पूर्वोक्तोभक्त्युद्रेकोऽपि युज्यते॥ भातृव्यावित्यत्र भ्रातुर्व्यच्चेतिव्यत्॥ १३॥

प०॥क्रमथतिमिरमुच्चैर्नष्टमासीत्तदानीं नखरशशिसुकांत्या तस्यवर्त्मोद्भवं यत्॥मनसि पशुपसूनोः

पंचशाखिप्रसंगात् प्रबलविपुलमोदो गांदिनीनंदनस्य॥ ३३॥

क्रमथेति ॥ तदानीमालिंगनसमये गांदिनीनंदनस्याऽक्रूरस्य वर्त्मोद्भवं मार्गोत्पन्नं उच्चैरतिशयितं क्रमथतिमिरं क्रमथ एव क्रमएव तिमिरमंधकरः ॥ क्रमथः क्रमः ॥ तिमिरं तमइति चामरात् ॥ पशुपसूनोर्नंदतनयस्य तस्य श्रीकृष्णस्य ॥ नखरेति ॥ नखरा नखा एव शशिनश्चंद्रास्तेषां सुकांत्या हेतुना नष्टमासीत् तथा पंचशाखिप्रसंगात् पंच शाखा इव शाखा अंगुल्योऽस्य संतीति पंचशाखी श्रीकृष्णहस्तस्तस्य यः प्रसंगः संयोगस्तस्माद्धेतुभूतात् मनसि अक्रूरांऽतःकरणे ॥ प्रबलेति ॥ प्रबलः केनाऽप्युपायेनाऽनभिभवनीयः विपुलः पुष्कलो यो मोदो हर्षः स आसीत् ॥ अथच पंचसंख्या ये शाखिनः कल्पद्रुमास्तेषां प्रसंगात् प्रबलो विपुलो यो मोदः सुगंधः स आसीत् ॥ यथा कल्पद्रुमयोगेन विपुलमोदोभवति तथैतद्धस्तयोगेन मोदोदयइति हस्तकल्पद्रुमयोरुपमानोपमेयभावो व्यंग्यः ॥ मालिनीवृत्तं ॥ ३३ ॥

सुंदरं मंदिरं कृष्णचंदिर स्स समानयत् ॥ तंचिरं श्रांतमश्रांताऽऽनंदसंदोहविह्वलम् ॥ ३४ ॥

सुंदरमिति ॥ सः कृष्ण एव चंदिरश्चंद्रः सकलाल्हादजनकत्वात्॥ दशाश्वस्तप्रग्रहणेमिचंदिरा इति चंद्रपर्यायेषु त्रिकांडशेषः ॥ तमक्रूरं सुंदरं मंदिरं स्वगृहं प्रति सम्यक् सत्कारपूर्वकमानयत् ॥ कीदृशं तं ॥ चिरं चिरकालं श्रांतं मार्गश्रमयुक्तं तथा ॥ अश्रांतेति ॥ सततेऽनारताऽश्रांतसंततताऽविर तानिशमित्यमरात् अश्रांतो निरंतरो

य आनंदसंदोहः कृष्णदर्शनप्रयुक्तस्तेन विह्वलं व्याप्तं ॥ ३४ ॥

प्रत्यग्रैः प्रणितादिभिः प्रणयिनं भोज्यैः प्रभुः प्रीणितं प्रोवाच प्रिययक्षकर्दमसमालिप्तं प्रतीक्ष्यं ततः ॥ तांबूलैर्घनसारसुक्रमुकसंयुक्चंद्रवालादिभिर्हृद्यै स्सौरभितास्यमेतमिति को हेतुस्त्वदीयाऽऽगमे ॥ ३५ ॥

प्रत्यग्रैरिति ॥ ततः गृहनयनाऽनंतरं प्रभुः श्रीकृष्णः प्रतीक्ष्यं पूज्यं पूज्यःप्रतीक्ष्यइत्यमरात्॥एतं अक्रूरं प्रति त्वदीयागमे तवायं त्वदीयो य आगम आगमनं तत्र हेतुः कारणं किमिति प्रोवाच ॥ कीदृशमेतं ॥ प्रत्यग्रैरभिनवैः ॥ प्रत्यग्रो ऽभिनवो नव्य इत्यमरात् ॥ प्रणितादिभिः प्रणितं रसादिसंयुतं व्यंजनं ॥ प्रणीतमुपसंपन्नमित्यमराद्दीर्घमध्यत्वेऽपि तद्व्याख्यायां ह्रस्वमध्योऽपि दर्शितः॥ तदादिर्येषां तैर्नानाविधैर्व्यंजनैस्तथा भोज्यैः नानाविधैः पक्कान्नैः प्रीणितं तर्पितं ॥ प्रीञ्तर्पणइति चौरादिकस्य णौ धूञ्प्रीञोर्नुग्वक्तव्य इति नुकि निष्ठांतं॥ तथा ॥ प्रणयिनं स्नेहवंतं ॥ तथा ॥ प्रिययक्षेति॥प्रियेण यक्षकर्दमेन एतदाख्येनांऽगरागेण समालिप्तं॥ कर्पूराऽगुरुकस्तूरीकंकोलैर्यक्षकर्दम इत्यमरः ॥तथा ॥घनसारेति॥ अथ कर्पूरमस्त्रियां॥ घनसारश्चंद्रसंज्ञ इत्यमरात् घनसारः कर्पूरः सच सुष्ठु यानि क्रमुकानि पूगफलानि तानि च॥ पूगः क्रमुकइत्यपीत्यमरात् ॥ द्वंद्वे तैः संयुनक्ति युक्ता भवतीति तथाविधा या चंद्रवाला एला ॥ पृथ्वीका चंद्रवालैलेत्यमरात् ॥ सा आदिर्येषां

तैस्तांबूलोपयुक्तैः पदार्थैः कृत्वा हृद्यैस्तांबूलैः सौरभितास्यं सौरभं संजातं यस्मिंस्तत्सौरभितं सुगंधयुक्तमास्यं यस्य तथाविधं॥३५॥

ग० ॥ तदात्वे स तेन पृष्टस्तुष्टस्तमेवं संजगाद ॥ ॥ १४ ॥

तदात्वेइति ॥ स्पष्टं ॥ तदात्वे तत्काले ॥ तेन श्रीकृष्णेन ॥ सः अक्रूरः ॥ तं श्रीकृष्णं ॥ १४ ॥

प० ॥ कंसेन प्रेषितोऽहं स्वं नामाऽन्वर्थयितुं हरे ॥ त्वयि त्वं तु तथा तस्य प्राणे कुरु यदुप्रिय॥३६॥

तदाह ॥ कंसेनेति ॥ हे हरे अहं कंसेन स्वं नाम त्वयि विषये अन्वर्थयितुं कंस्ते हिनस्तीति कंस इत्यनुगतार्थं कर्तुं मद्द्वारा आनाय्य त्वां हिंसितुमित्यर्थः ॥ प्रेषितः अस्मि ॥ हे यदुप्रिय यदुशब्देन लक्षणया यादवास्ते प्रिया यस्य तत्संबोधनं ॥ एतेन यादवदुःखदातुर्हनने कथनाऽपेक्षा नास्तीति सूचितं ॥ त्वंतु तस्य कंसस्य प्राणे स्वं नाम हरिरित्याकारकं तथा हरतीति हरिरित्यन्वर्थं कुरु कंसस्य प्राणहरणं कुर्वित्यर्थः ॥ ३६ ॥

ग० ॥ ततस्तेनोदितं वृत्तांतं नितांतं स उत्साहजनकं निजजनकायाऽऽवेद्य सद्यस्स्वप्रियाऽऽल्हाददमनं स्वीयमथुरागमनं प्रत्यावासमघोषयत् ॥ ॥ १५ ॥

ततइति ॥ ततो ऽक्रूरवाक्यश्रवणानंतरं सः श्रीकृष्णः तेनाक्रूरेणोदितमुक्तं नितांतमत्यंतं उत्साहजनकं धनुर्यागदर्शनार्थमाव्हानरू-

पं वृत्तांतं निजजनकाय नंदाय निवेद्य सद्यस्तत्कालमेव ॥ स्वेति॥ स्वस्य प्रिया गोप्यस्तासामाल्हादस्याऽऽनंदस्य दमनं उपशमयितृ नाशकमितियावत् ॥ स्वीयेति ॥ स्वीयं स्वकीयं यन्मथुरां प्रति गमनं तत् प्रत्यावासं प्रतिगृहं अघोषयत् घोषितवान् ॥ १५॥

तदानीं॥प०॥विरहमिहिरतीक्ष्णाऽभीषुरूपात्स्वनात्स्त्रीवदनकुमुदवृंदं म्लानतामाप मंक्षु॥नयनमधुपसंघः प्रोच्चपारिप्लवत्वं यदुपतिपुरयानोद्बोधकान्नंदसूनोः॥ ३७॥

तदानीमिति ॥ विरहेति ॥ तदानीमुद्घोषणाऽवसरे नंदसूनोः श्रीकृष्णस्य॥यदुपतीति॥यदुपतेः कंसस्य पुरं मथुरा तस्मिन् यत् यानं गमनं तस्य उद्बोधकात् ज्ञापकात् ॥ विरहेति ॥ विरह एव मिहिरः सूर्यस्तस्य तीक्ष्णाः क्रूरा ये अभीषवः किरणास्तद्रूपात् स्वनात् घोषणध्वनेर्हेतोः ॥ स्त्रीति ॥ स्त्रीणां गोपीनां यानि वदनानि तान्येव कुमुदानि तेषां वृंदं मंक्षु शीघ्रं म्लानतामाप ॥ सूर्यकिरणसंपर्कात् कुमुदानि म्लायंते ॥ एवंसति ॥ नयनेति ॥ नयनानि अर्थाद्गोपीलोचनानि तान्येव मधुपा भ्रमरास्तेषां संघः ॥ प्रोच्चेति ॥ प्रोच्चमतिशयितं यत्पारिप्लवत्वं चांचल्यं तत् आप ॥ कुमुदमुकुलीभावे स्वलब्धाऽवकाशानां भ्रमराणां चांचल्यं भवति ॥ मालिनीवृत्तं ॥ ॥ ३७ ॥

हृत्तापवन्हितप्तो हृद्यरसोऽगाद्बहिर्दृगंबुमिषात् ॥ चिंताऽऽज्यसेकयोगात्तदा स ववृधे निरर्गलस्तासां॥ ३८॥

हृदिति ॥ तदा कृष्णगमनश्रवणाऽवसरे तासां गोपीनां हृत्ताप एव वन्हिस्तेन तप्तः हृदि भवो हृद्यः स चाऽसौ रसः शृंगारः यद्वा प्रेमरसः दृगंबुमिषात् दृक्संबंधि यदंबु अश्रूदकं तस्य मिषात् बहिरगात् सः हृत्तापवन्हिः ॥ चिंतेति ॥ चिंतैवाऽऽज्यं तस्य यः सेकः सेचनं तस्य योगात् निरर्गलो ऽप्रतिबंधो ववृधे ॥ कृष्णस्य मथुरागमनं श्रुत्वा गोपीनां हृदये विरहतापवृद्धिर्नेत्रेष्वश्रुप्रादुर्भावश्चाऽऽसीदिति भावः ॥ ३८ ॥

ग० ॥ तदाऽऽत्मन्यन्वर्थनामानं तं द्रुहिणमेनमक्रूरमुद्दिश्य चैवं ता स्संजगदुः॥ १६॥

अथैवंविधविरहतापतप्तगोपीकृतविध्युपालंभं कृष्णनयनार्थमागतस्याक्रूरस्योपालंभं च वर्णयति ॥ तदेति ॥ तदा तद्वार्ताश्रवणावसरे ताः गोप्यः आत्मनि विषये अन्वर्थनामानं अन्वर्थं द्रोग्धीति द्रुहिण इत्यनुगतार्थं नाम यस्य तं कृष्णस्य मथुरागमनप्रेरकतया स्वद्रोहकारिणमित्यर्थः ॥ तं प्रसिद्धं द्रुहिणं ब्रह्माणं च परं एनं कृष्णनयनायाऽऽगतं पुरोवर्तिनं अक्रूरं उद्दिश्य एवं वक्ष्यमाणं संजगदुरुक्तवत्यः ॥ १६ ॥

प० ॥ दत्वाऽऽसेचनकं त्वं कृष्णाख्यं हर्तुमुद्यतोऽसि दृशां॥ पुरतोऽसवोऽस्मदीयाः प्रयाणकाले प्रयांति यस्य विधे॥ ३९॥

तदाह ॥ दत्वेति ॥ हेविधे त्वं कृष्णाख्यं कृष्णइति आख्या यस्य तत् कृष्णाख्यं दृशां व्रजवासिनामस्माकं दृष्टीनां आसेचनकं दर्शनजन्यतृप्त्यनाधायकं वस्तु ॥ तदासेचनकं तृप्तेर्नास्त्यंतो यस्य

दर्शनादित्यमरः ॥ प्रथमं दत्वा इदानीं हर्तुमुद्यतोऽसि ॥ लौकिकाऽऽसेचनकाऽपेक्षया एतस्याऽऽधिक्यं दर्शयंति ॥ यस्य कृष्णाऽऽख्याऽऽसेनचकवस्तुनः प्रयाणकाले मथुरागमनसमये अस्मदीयाः असवः प्राणाः पुरतस्त्वद्गमनात्पूर्वं प्रयांति ॥ वर्त्तमानसामीप्ये वर्तमानवद्वेति वर्तमानवत्प्रयोगः ॥ एवंच त्वं दत्तापहारी दीनस्त्रीप्राणहारी च भविष्यसीति भावः ॥ ३९ ॥

औपेंद्रनाभिपद्मप्रोद्भूते क्ष्वेडकंठजनिहेतौ ॥ वंचकता निर्दयता युक्ता त्वयि साऽनुभूयते धातः ॥ ॥ ४० ॥

अथवा वंचकनिर्दयशिरोमणेस्तव नैतद्दोषभयशंकेत्याहुः ॥ औपेंद्रेति ॥ हेधातः उपेंद्रो वामनस्वरूपेण बलिवंचनपूर्वकं स्वदत्तसंपदपहारको नारायणस्तस्याऽयमौपेंद्रो यो नाभिस्तत्संबंधि यत्पद्मं तस्मात्प्रोद्भूते ॥ तथा ॥ क्ष्वेडेति ॥ क्ष्वेडं विषं कंठे यस्य स क्ष्वेडकंठः सर्वसंहर्ता रुद्रस्तस्य जनिहेतौ जन्मकारणे ॥ ब्रह्मणो भ्रूमध्याद्रुद्राविर्भाव इति भागवतोक्ताकथाऽनुसंधेया ॥ एतादृशे त्वयि वंचकता तथा निर्दयताच युक्ता अस्ति ॥ सा वंचकता निर्दयता च अस्माभिरिति शेषः अनुभूयते ॥ वंचनया बलिसकाशात् त्रैलोक्यहरणाद्वंचकशिखामणिवामनरूपनारायणनाभिपद्मसंभूतत्वेन वंचकता कारणगता त्वयि संक्रांता तथा सकलजगत्संहारकरुद्रजनकत्वेन कार्यगतनिर्दयत्वहेतुकाऽनुमानेन निर्दयताऽपि वर्ततइत्येवं कर्तुमुद्यतोऽसीति भावः ॥ ४० ॥

सत्यप्यतीव शश्वत् क्रूरत्वे ऽक्रूरतेऽभिधा युक्ता ॥

यद्वसुदेवापत्यं नेतुं मथुरां समागतोऽस्यधुना ॥ ४१ ॥

अथाऽक्रूरेतिनामश्रवणानंतरमेतादृशक्रूरकर्मकार्ययमक्रूरः कथमित्याशंक्य क्रूरत्वे ऽप्यक्रूरनामसमर्थनपूर्वकं तमुपालभंते स्मेत्याह ॥ सत्यपीति ॥ हे अक्रूर यद्यस्मात्त्वं अधुना वसुदेवापत्यं श्रीकृष्णं मथुरां प्रति नेतुं समागतोऽसि अतः शश्वन्निरंतरं अतीव अत्यंतं क्रूरत्वे सत्यपि ते अभिधा अक्रूरेति नाम युक्ताऽस्ति ॥ अयं भावः ॥ अकारो वासुदेवः स्यादित्येकाक्षरात् ए वासुदेवे विषये क्रूरः अत्रत्यैतादृशनिरवधिकसुखविघातकत्वेनाऽतिनिर्दय इत्यर्थांऽतरेण क्रूरेऽपि त्वयि अक्रूरनामसंगतिरिति ॥ ४१ ॥

अथवाऽयं ॥ व्रजजनव्रजजीवितमुत्सुको व्रजयितुं निजवर्त्मनि तद्यमः ॥ स्वयमुपागत एव सखिस्वसुः किल पयःपरिपुष्टमिति प्रभुः ॥ ४२ ॥

अथवेति॥व्रजेति॥हेसखि अथवा अयमक्रूरः तत् व्रजजनव्रजजीवितं व्रजसंबंधिलोकसमूहजीवनं स्वसुर्भगिन्या यमुनायाः पयसा उदकेन परिपुष्टं अस्ति इति हेतोः निजवर्त्मनि व्रजयितुं गमयितुं भगिनीवात्सल्यात् प्रापयितुमिति यावत् उत्कंठित उत्सुकः सन् स्वयमुपागतः प्रभुः समर्थो यमएव अस्ति ॥ किलेति संभावनायां ॥ प्रभुरित्यनेन नेतुमागतोऽयमस्माभिरनिवार्यइति सूचितं ॥ द्रुतविलंबितं वृत्तं ॥ ४२ ॥

कृताऽवहित्थः किल सूर्यसूनुः स्वसुः सपत्न्याः सदनानि मत्वा ॥ शून्यानि कर्तुं ननु तानि सोऽस्म

द्विलोचनान्यागत इंदिरायाः॥ ४३॥

यमाऽऽगमने द्वितीयमपिप्रयोजनं संभावयंति ॥ कृतेति ॥ सूर्यसूनुः सूर्यपुत्रो यमः किल ॥ एतेन तापदत्वं सूचितं ॥ कृताऽवहित्थः कृता अवहित्था अक्रूररूपेणाऽऽकारगोपनं येन स तथाविधः सन् समागतः अस्ति ॥ किं कर्तुं ॥ अस्मद्विलोचनानि अस्मन्नयनानि स्वसुर्भगिन्या यमुनायाः सपत्न्याः इंदिरायाः सदनानि गृहाणि मत्वा ॥ लक्ष्म्याः पद्माऽऽलयत्वेन नयनानां च पद्मसदृशत्वात् ॥ तानि स्वस्वसृसपत्नीगृहत्वेन संभावितान्यस्मन्नयनानि शून्यानि श्रीकृष्णस्य मथुरानयनेन दृश्यविषयमात्ररहितानि कर्तुं ननु ॥ नन्वित्युत्प्रेक्षायां ॥ किलेति वाक्यालंकारे ॥ उपजातिर्वृत्तं ॥ ४३॥

ग० ॥ एवं विरहाऽऽगमगदेन निगदंतीनां तासां तद्दर्शनाऽऽशेव निशाऽपि तनिमानमवाप॥ १७॥

एवमिति ॥ तासां गोपीनां तद्दर्शनाऽऽशेव तद्दर्शनस्य श्रीकृष्णाऽवलोकनस्य आशा सेव निशाऽपि तनिमानं सूक्ष्मत्वं अवाप प्राप्तवती ॥ अक्रूरेण श्रीकृष्णे नीयमाने सति गोपीनां पूर्ववत्प्रतिक्षणं दर्शनस्याऽशा यथा निवृत्ताऽभूत्तथा निशाऽपि निवृत्ताऽभूदित्यर्थः ॥ कीदृशीनां गोपीनां ॥ विरहाऽऽगमरूपरोगेण एवं पूर्वोक्तप्रकारेण निगदंतीनां भाषमाणानां ॥ १७ ॥

प० ॥ अद्मरे तमसां पद्मबंधावभ्युदिते दिवि ॥ सद्मतश्चलितुं पद्मापतिश्चक्रे मतिं तदा ॥ ४४ ॥

अद्मरइति ॥ तमसां अद्मरे भक्षके नाशके इति यावत् ॥ भक्ष-

को घस्मरोऽद्मरइत्यमरात् ॥ एवंविधे पद्मबंधौ सूर्ये दिवि आकाशे अभ्युदिते उदयंप्राप्तेसति तदा पद्मापतिर्लक्ष्मीपतिः श्रीकृष्णः॥ एतेन लक्ष्म्याश्चपलत्वात्तत्पतेरेतस्याऽपि चपलत्वं सूचितं ॥ सद्मतो गृहाच्चलितुं मतिं चक्रे ॥ ४४ ॥

संमंत्र्यमंत्रिभिस्तत्र गंत्रीगणनियंतृकान् ॥ जनान्नियोजयामास योक्तुं तान्विजयप्रियः॥ ४५॥

संमंत्र्येति ॥ विजयप्रियः अर्जुनप्रियः श्रीकृष्णः विजयः कंसनाशनेन स्वोत्कर्षः प्रियो यस्येति वा तत्र गमनसमये मंत्रिभिः सह संमंत्र्य विचार्य ॥ गंत्रीगणेति ॥ गंत्री कंबलिवाह्यकमित्यमरात् गंत्रीणां कंबलिवृषभवाह्यशकटानां गणाः समूहास्तेषां नियंतारएव नियंतृकास्तान् ॥ स्वार्थेकः ॥ जनान् शकटाऽधिकृतान् पुरुषान् तान् गंत्रीगणान् योक्तुं वृषभयोजनेन सज्जान् कर्तुं नियोजयामास ॥ ४५ ॥

ग० ॥ ततो निजप्रतिपाद्यमाद्यमाज्ञाय तं सपद्यागतैस्सुवर्णाऽऽभरणगणकोरकितैस्तन्मंजुसिंजितसुस्वरैः पदप्रकरविन्यासदर्शितपरमसुखैः सद्गुणनियंत्रितैरक्रूरप्रेरितैश्चतुर्भिरुपनिषत्संघैरिव सैंधवधौरेयैर्धावनजवनिर्जितप्रबलपवनैः काशकुसुमसंकाशदेहद्युतिदर्शनजनितलज्जाऽतिरेकवनवासीकृतसितच्छदैरुह्यमानेन निजाधिदैवतमिदमिति विमृश्य दिविषद्वर्त्म विहायाऽवनिवर्त्म परिष्कु

र्वता महता महस्करचक्रवालेनेव चामीकररोचिष्णुरत्ननिकुरंबघटितेन स्यंदनेन नंदनंदनः पस्पंदे ॥ १८ ॥

ततइति ॥ ततः नंदनंदनः श्रीकृष्णः स्यंदनेन रथेन पस्पंदे मथुरां गंतुं चलितवान् ॥ कीदृशेन रथेन ॥ चतुर्भिः सैंधवधौरेयैरश्वश्रेष्ठैरुह्यमानेन ॥ अश्वविषये उत्प्रेक्षते ॥ तं श्रीकृष्णं निजप्रतिपाद्यं स्वप्रतिपाद्यं आद्यं सर्वकारणं परमात्मानं आज्ञाय ज्ञात्वा सपदि तत्कालं आगतैश्चतुर्भिर्वेदचतुष्टयसंबंधिभिरुपनिषत्संघैरिवेति॥ उभयसाधारणविशेषणान्याह ॥ सुवर्णेत्यादि ॥ सुवर्णाऽऽभरणानां ये गणास्तैःकोरकितैर्व्याप्तैर्युक्तैरिति यावत् पक्षे शोभनानि वर्णान्यक्षराणि ॥ वर्णं तु चाऽक्षरे इत्यमरात् ॥ तान्येवाऽऽभरणानि तेषां गणैः कोरकितैः ॥ तथा ॥ तदिति ॥ तेषां स्वर्णाऽऽभरणानां यानि मंजुसिंजितानि तैः सुष्ठु स्वरो येषां ते सुस्वरा उत्तमस्वरयुक्तास्तैः पक्षे तेषामुत्तमाऽक्षररूपाणामाभरणानां मंजु रम्यं सिंजितं ध्वनिर्येषु तेच ते शोभनाः स्वरा उदात्तादयो येषु ते चेति विशेषणोभयपदः कर्मधारयः तथाविधैः ॥ तथा ॥ पदेति पदप्रकरस्य चरणसमूहस्य विन्यासेन सुशिक्षितनिवेशेन दर्शितं परमसुखं यैस्तथाविधैः पक्षे पदानां सुप्तिङंतादिरूपाणां यः प्रकरस्तस्य विन्यासरूपात्पर्याऽवगाहनपूर्वकं सार्थकतया निवेशस्तेन दर्शितं परमसुखं निरवधिसुखरूपं ब्रह्म यैस्तैः ॥ तथा॥ सदिति ॥ संतो दृढमृदवो ये गुणाः प्रग्रहास्तैर्नियंत्रितैर्नियमितैः पक्षे संत उ

त्तमा ये गुणा यथार्थवक्तृत्वादयस्तैर्नियंत्रितैः यद्वा संत उत्तमागुणा येषां तैर्व्यासादिभिर्नियंत्रितैः अधिकरणरचनादिना अर्थतोव्यवस्थापितैः यद्वा सतः परमात्मनो ये गुणा आनंदादयस्तैर्नियंत्रितैः तद्वर्णनपरैरित्यर्थः ॥ तथा ॥ अक्रूरेति ॥ अक्रूरेण यादवेन प्रेरितैः पक्षे क्रूरभिन्नेन शांतेन ब्रह्मणा प्रेरितैः यद्वा अक्रूरैः सात्विकैः प्रकर्षेण ईरितैः आदरपुरःसरमुच्चारितैः ॥ केवलमश्वान् विशिनष्टि ॥ धावनेति ॥ धावनस्य जवो वेगस्तेन निर्जितः प्रबलः पवनो वायुर्यैस्तैः॥ पवनाधिकवेगैरित्यर्थः॥तथा॥काशेति॥ काशकुसुमैः संकाशा सदृशी या देहद्युतिर्देहसंबंधिनी शुभ्रकांतिस्तस्यां दर्शनेन जनिता उत्पादिता या लज्जा तस्या अतिरेकेण आधिक्येन वनवासीकृताः वनवासिनः अरण्यवासिनो जलवासिनो वा कृताः सितच्छदा हंसा यैस्तैः ॥ अत्रवनशब्दो जलाऽरण्ययोः श्लिष्टः ॥ पुनःकीदृशेन रथेन ॥ चामीकरेति ॥ चामीकरेण स्वर्णेन कृत्वा रोचिष्णुः शोभनो यो रत्ननिकुरंबो रत्नसमूहस्तेन घटितेन युक्तेन स्वर्णखचितरत्नसमुदायघटितेनेत्यर्थः ॥ यद्वा चामीकरेण तथारोचिष्णुना तेजस्विना रत्ननिकुरंबेण च घटितेन ॥ रथविषये उत्प्रेक्षते ॥ निजेति ॥ इदं श्रीकृष्णरूपं निजं स्वकीयं आद्यदेवतं नारायणाख्यं अस्ति इति विमृश्य विचार्य ॥ उक्तंच ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणइत्यादि ॥ दिविषदिति ॥ दिविषदां देवानां वर्त्म आकाशं विहाय त्यक्त्वा अवनिवर्त्म भूमार्गं परिष्कुर्वता अलंकुर्वता महता विशालेन महस्करस्य सूर्यस्य यच्चक्रवालं मंडलं तनेव ॥ चक्रवालं तु मंडलमित्यमरात्॥ अयं रथोन भवति किंतु स्वाधिदैवते श्रीमन्नारायणे मां विहाय

वसुधातले संचरितुं प्रवृत्ते सति ममाऽऽकाशस्थितिरयुक्तेति वि-
चार्य भूतलाऽवतीर्णमादित्यमंडलमेवैतदिति भावः॥अतएव भगव-
तस्तदंतःस्थितिर्युक्ता ॥ अत्र अलंकुर्वतेत्यर्थकेन परिष्कुर्वतेत्यने-
नैतल्लोकनिवासिनां तापाद्यभावार्थं सौम्यरूपाऽऽलंबनं सूचितं ॥
॥ १८ ॥

प० ॥ नवीनचीनदीनाक्ष्यः संलक्ष्याऽऽसन् रथोत्थितम्॥ धूलिवृंदं तथा हंत शालभंज्य इवाऽबलाः॥ ॥ ४६॥

नवीनेति ॥ नवीनो बालक इत्यर्थः ॥ एवंविधो यश्चीनो मृगभे-
दस्तद्वद्दीनानि भयतरलान्यक्षीणि यासां ताः ॥ चीनो देशांऽशु-
कव्रीहिभेदे तंतौ मृगांतरे इति मेदिनी ॥ एवंविधा अबला गोप्यः
तदा श्रीकृष्णगमनसमये रथोत्थितं धूलिवृंदं संलक्ष्य दृष्ट्वा शा-
लभंज्य इव पुत्रिका इव ॥ चलनादिव्यापारशून्याइत्यर्थः ॥ आ-
सन् ॥ हंतेति खेदे ॥ ४६ ॥

नाऽयं रजोऽणुसंघो रथमथ परित स्समावृणो द्योऽस्य ॥ प्रेयोजनजीवानां निचयो नो चेत्कथं विचेष्टास्ते॥ ४७॥

रथोत्थितं रज उत्प्रेक्षापूर्वकं वर्णयति ॥ नायमिति ॥ अथ यः
अस्य श्रीकृष्णस्य रथं परितः सर्वतः समावृणोत् व्याप्नोति स्म
सोऽयं रजोऽणुसंघः रजःकणसमूहः न किंतु प्रेयोजनानां इष्टत-
मजनानां गोप्यादीनां ये जीवा अणुरूपास्तेषां चयः संघः अ-
स्ति ॥ जीवानामणुरूपत्वं च व्यवस्थापितं भाष्ये द्वितीयाऽध्याये

तृतीयपादे श्रीमद्वल्लभाचार्यैः ॥ एषोऽणुरात्मा चेतसा वेदितव्य-
इति श्रुतेश्च ॥ एतदेव व्यतिरेकेण द्रढयति ॥ नोचेदिति ॥ नोचेत्
अयं जीवसंघो नचेत् ते प्रेयोजनाः विचेष्टाः चलनादिव्यापारशू-
न्या अचेतना इति यावत् कथं आसन्निति शेषः ॥ यस्मादिमे
अचेतना अत एतेषां जीवा एव रजोरूपेण रथं परिवेष्ट्य तेन सा-
कं गता इति ज्ञायतइति भावः ॥ ४७ ॥

ग० ॥ ततस्तन्मनोरथ इव रथोत्थितरेणुपटले ऽपि विलीने सति॥ १९॥

ततइति ॥ योजना स्फुटा ॥ तन्मनोरथे गोपीजनमनोरथे॥ श्री-
कृष्णगमने तासां दर्शनाऽऽशा यथा लीनातथा रजस्यपि शांते
सतीत्यर्थः ॥ १९ ॥

प० ॥ नीते वितरणद्रव्ये दानिनं पुण्यपंक्तयः ॥ वनीपकजनैर्गोष्ठमाययुस्ताः शुभास्तथा॥ ४८ ॥

नीतेइति ॥ अथ शुभास्तागोप्यस्तथा तद्वत् गोष्ठं आययुः ॥ तथा
कथं ॥ वनीपकजनैर्याचकजनैः ॥वनीपको याचनक इत्यमरात्॥
वितरणद्रव्ये वितरणस्य दानस्य संबंधि यद्द्रव्यं तस्मिन् दात्रा द-
त्ते धने इत्यर्थः ॥ नीतेसति शुभाः पुण्यपंक्तयः दानिनं यथा
दातारमिव ॥ वनीपकसदृशेनाऽक्रूरेण देयद्रव्यसदृशे श्रीकृष्णे म-
थुरां प्रति नीते दातृसदृशं गोष्ठं प्रति पुण्यपंक्तिसदृश्यो गोप्य आ-
ययुरित्यर्थः ॥ ४८ ॥

ग० ॥ अथ रथचक्रचक्रचलनक्षोणीघर्षणप्रसृमरश्रवणसुखवर्षणघोषहयहेषितस्तनितशंकिके

किकेकाकलितशकुंतकुलकलकूजितैःकोलाहलितं विविधद्रुमवल्लिमतल्लिकागुल्मतल्लजबहलबल्वज प्रेक्षणाऽऽनंदप्रदं मंथराऽनिलैजत्तत्प्रसवप्रसृतप रागपटलमिलद्धयखरखुराऽग्रोल्लिखितमेदिन्युड्डी यमानधूलिधोरणीदुर्दिनीकृतदिगंतरमपि निजप्र चरणसुदिनीकृताऽऽशाऽवकाशं नानामृगव्रजधृत निजपोषणाऽऽशं स्वयं सुधरमपि स्वसुषमाऽधरी कृतनंदनं पावनं वनं नंदनंदन स्सानंदं परिपश्य न्मत्प्रियतमोऽत्राऽद्यैवाऽऽगमिष्यतीत्येवमवधार्य तयैवाऽऽस्तृतमृदुलाऽऽस्तरणेनेव शार्करोपमशार्क रनिकरेण परिपूरितं सूर्यजापरिसरं सत्वरं सबल स्समाससाद॥ २०॥

अथेति ॥ निर्गमनानंतरं सबलो बलरामसहितो नंदनंदनः श्रीकृष्णः सत्वरं यथा तथा सूर्यजापरिसरं सूर्यजाया यमुनाया यः परिसरः पर्यंतभूभागस्तं॥पर्यंतभूः परिसरइत्यमरः॥ समाससाद प्राप्तोऽभूत् ॥ कीदृशं सूर्यजापरिसरं ॥ शार्करोपमेत्यादि ॥ शार्करः स्याद्दुग्धफेनशर्करान्वितदेशयोरिति मेदिनीकोशात् शार्करोपमोऽतिशुभ्रत्वाद्दुग्धफेनसदृशो यः शार्करः सूक्ष्मसिकतासंबंधी निकरः समूहस्तेन परिपूरितं ॥ सिकतानिकरविषये उत्प्रेक्षते ॥ तयैव यमुनयैव मत्प्रियतमः मम प्रियतमः श्रीकृष्णः अद्याऽत्रैवाऽऽगमिष्यतीत्येवं अवधार्य निश्चित्य ॥ आस्तृतेति ॥ आस्तृत-

मुपवेशनार्थमास्तीर्णं यन्मृदुलं कोमलमास्तरणं तेनेवेत्युत्प्रेक्षा॥अयं सिकतानिकरो न भवति किंतु यमुनया स्वप्रियसंभावनार्थमास्तृतं मृदुतराऽऽस्तरणमेवेति भावः ॥किं कुर्वन्॥ पावनं वनं साऽऽनंदं यथा स्यात्तथा परिपश्यन् सर्वतः पश्यन् ॥ कीदृशं वनं ॥ रथेति ॥ रथचक्राणां यच्चक्रं मंडलं तस्य यच्चलनं तेन यत्क्षोणीघर्षणं तेन प्रसृमरः प्रसरन् श्रवणयोः कर्णयोः सुखवर्षणो यो घोषो रथचक्रक्षोणीघर्षणजन्यो ध्वनिरित्यर्थः ॥ स च हयहेषितानि च तेषु स्तनितशंकिनः मेघध्वनिशंकाकारिणो ये केकिनो मयूरास्तेषां याः केका ध्वनयस्ताभिः कलितानि युक्तानि यानि शकुंतकुलानां पक्षिसंघानां कलकूजितानि अव्यक्तमधुरशब्दितानि तैः कोलाहलितं संजातकोलाहलं ॥ तथा ॥ विविधेति ॥ द्रुमाश्च वल्लयश्च द्रुमवल्लयः प्रशस्ता द्रुमवल्लयो द्रुमवल्लिमतल्लिकाः प्रशस्ता गुल्माः प्रकांडरहिता वृक्षा गुल्मतल्लजाः ॥ अप्रकांडे स्तंबगुल्मावित्यमरात् ॥ बहला ये बल्वजा उपलक्षणतया तृणानि च ॥ पुंसि भूम्नि तु बल्वजा इत्यमरः ॥ एतेषां द्वंद्वे विविधानां तेषां यत्प्रेक्षणमवलोकनं तेनाऽऽनंदप्रदं॥ तथा ॥ मंथरेति॥मंथरो मंदो यो ऽनिलो वायुस्तेनैजंतः कंपंतो ये तत्प्रसवास्तेषां द्रुमवल्ल्यादीनां प्रसवाः पुष्पाणि ॥ स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने इत्यमरात् ॥ तेभ्यः प्रसृतं यत्परागपटलं कुसुमरेणुसंघः ॥ परागः कौसुमे रेणौ समूहे पटलं न नेति चामरात् ॥ तेन मिलंती मिश्रीभवंती या हयानामश्वानां खरैः कठिनैः खुराग्रैरुल्लिखिताया मेदिन्याः पृथ्व्याः सकाशादुड्डीयमाना धूलिस्तस्या या धोरणी परिपाटी तया दुर्दिनीकृतानि दिगंतराणि यस्मिंस्तत् ॥ ए-

वंविधमपि ॥ निजेति ॥ निजं श्रीकृष्णसंबंधियत्प्रचरणं संचारस्तेन सुदिनीकृता आशाऽवकाशा दिगंतराणि यस्मिंस्तत् ॥ अत्रदुर्दिनसुदिनयोः शब्दतो विरोधः ॥ तथा ॥ नानेति ॥ नाना अनेके ये मृगव्रजा मृगसमूहास्तैर्धृता निजपोषणे आशा यस्मिंस्तत् ॥ तथा ॥ स्वयमिति ॥ स्वयं स्वतः सुधरं सुष्ठु धरा भूमिर्यस्मिंस्तत् तथाविधमपि ॥ स्वेति ॥ स्वस्य या सुषमा परमा शोभा तया अधरीकृतं तिरस्कृतं नंदनमिंद्रोद्यानं येन तत्तथाविधं ॥ अत्र सुधराऽधरशब्दयोर्विरोधः ॥ २० ॥

**प० ॥ तत्र तत्समवलोक्य तदीयं नीरमेष नवनी
रदशोभम् ॥ पातुकाम इव मुख्यसुधां वै सोपहा
समिदमाह स तस्याः ॥ ४९ ॥**

तत्रेति ॥ तत्र वने स एषः श्रीकृष्णः तत् तदीयं तस्या यमुनाया इदं तदीयं ॥ नवेति ॥ नवीनमेघशोभं तद्वन्नीलवर्णमित्यर्थः ॥ नीरमुदकं समवलोक्य सम्यगभिलाषपूर्वकं दृष्ट्वा तस्या यमुनाया मुख्यसुधां मुखे भवा मुख्या सुधा अधराऽमृतमिति यावत् ॥ शरीरावयवाद्यत् ॥ तां पातुकाम इव पातुं कामो ऽभिलाषो यस्य स तथाविधः सन्निव ॥ तुंकाममनसोरपीति मलोः ॥ सोपहासमिदं वक्ष्यमाणमाह ॥ स्वागता वृत्तं ॥ स्वागतेति रनभाद्गुरुयुग्ममिति तल्लक्षणात् ॥ ४९ ॥

**तपर्तुकन्योदन्येयं मन्येऽहं बंधकीति यत् ॥ गला
ऽऽश्लेषपरा लोके रसैः शांतिमती सदा ॥ ५० ॥**

तदाह ॥ तपर्त्विति ॥ इयं तपर्तोर्ग्रीष्मर्तोः कन्या ॥ अस्मिन् बाहु-

ल्येन पिपासोदया तत्कन्यात्वव्यपदेशः ॥ एवंविधा उदन्या पिपासा ॥ उदन्या तु पिपासा तृडित्यमरात् ॥ बंधकी कुलटा अस्ति ॥ पुंश्चली धर्षणी बंधक्यसती कुलटेत्यमरात् ॥ इति अहं मन्ये ॥ यद्यस्माद्धेतोः लोके जने सदा गलाऽऽश्लेषपरा सर्वप्राणिनां गलालिंगनतत्परा भवति ॥ उदिता तृट् गलं गृह्णात्यत एव हि तदुदये गलः शुष्यति ॥ एतेन सर्वप्राणिगलग्रहणतत्परतया प्रसिद्धबंधक्यपेक्षयाऽऽधिक्यं सूचितं ॥ अथच बंधक्यपि निर्लज्जतया पुरुषाणां तत्राऽपि व्यभिचारिणां गलाऽऽलिंगनप्रवृत्ता भवति ॥ तथा ॥ रसैरुदकैः शांतिमती भवति ॥ बंधक्यपि शृंगाररसैः परस्परप्रेमभिर्वा शांतिमती भवति ॥ शृंगारस्याऽऽधिक्यबोधनाय बहुवचनं अवस्थाभेदेन भेदाद्वा ॥ ५० ॥

**ग० ॥ ततः स स्ववचनसीधुसाम्यं समीक्षितुमि
व सरसिजसुखदसुतासुधां संपीय ॥ २१ ॥**

ततइति ॥ सः श्रीकृष्णः ॥ सरसिजेति ॥ सरसिजानां कमलानां सुखदः सूर्यस्तस्य सुता यमुना ॥ एतेन यमुनाया अपि सुखदत्वं ध्वनितं ॥ तस्याः संबंधिनी या सुधा सुधासदृशं जलं तां संपीय पीत्वा ॥ अस्योत्तरश्लोकेनाऽन्वयः ॥ उत्प्रेक्षते ॥ स्वेति ॥ स्वस्य यद्वचनं तद्रूपं यत्सीधु तस्य साम्यं समीक्षितुमिव परीक्षितुमिव ॥ २१ ॥

**प० ॥ सुपर्णश्रीयुतं रम्यं सुनीडं फलदं सुमं ॥ स्वं
रूपमिव संप्राप्य वृक्षखंडं हरिः स्थितः ॥ ५१ ॥**

सुपर्णेति ॥ हरिः श्रीकृष्णः स्वं स्वकीयं रूपमिव ॥ स्वीयरूपसदृशमित्यर्थः ॥ वृक्षखंडं वृक्षसमूहं प्राप्य स्थितः आसीदितिशेषः ॥

कीदृशं वृक्षखंडं स्वरूपंच ॥ सुपर्णेति ॥ सुष्ठु या पर्णश्रीः पर्णानां शोभा तया युतं ॥ पक्षे सुपर्णो गरुडस्तेन कृत्वा या श्रीः शोभा तया युतं ॥ तथा ॥ मनोहरं रम्यं पक्षे योगिनां रमणयोग्यं ॥ तथा ॥ सुष्ठु नीडानि पक्षिगृहाणि यस्मिंस्तत् पक्षे डलयोरभेदाद्त्यंतं नीलं श्यामं ॥ तथा ॥ फलदं फलानि ददातीति फलदं पक्षे कर्मादिफलदातृ ॥ तथा ॥ सुमं आर्श आद्यचि पुष्पयुक्तं पक्षे सुष्ठु मा लक्ष्मीर्यस्मिंस्तत् ॥ ५१ ॥

ग० ॥ तदात्वे तं मुदा त्वेतं बलं बलाऽनुज एवं बभाषे ॥ २२ ॥

वृक्षसमूहवर्णनमुपक्रमते ॥ तदात्वे इति ॥ बलानुजो बलरामस्याऽनुजः श्रीकृष्णः तदात्वे तु तत्कालएव तं एतं समीपवर्तिनं बलं बलरामं प्रति मुदा हर्षेण एवं वक्ष्यमाणप्रकारेण बभाषे ॥ अथवा मुदा हर्षेण एतं अतिशयेन युक्तं ॥ आङ्पूर्वादिणः क्तः ॥ २२ ॥

प० ॥ विद्येव राजते च्छाया सुखदा तापहारिणी ॥ श्रमाल्लभ्या गुरो स्सम्यक्पदशस्तप्तमानुषैः ॥ ५२ ॥

तदाह ॥ विद्येवेति ॥ हेबलरामेति शेषः छाया वृक्षसंबंधिनी विद्येव राजते ॥ कीदृशी च्छाया विद्याच ॥ तापहारिणी आतपजन्यक्लेशहारिणी पक्षे सांसारिकक्लेशहारिणी अतएव सुखदा सुखदात्री पक्षे लौकिकाऽलौकिकसौख्यदात्री अतएव तप्तमानुषैः आतपखिन्नमनुष्यैः पदशः पदे पदे इति पदशः प्रतिपदमित्यर्थः ॥

गुरोर्महतः श्रमात् गमनायासात् ॥ सम्यग्लभ्या ॥ पक्षे तप्तमानुषैः संसारतापखिन्नैर्मनुष्यैः सम्यक् उत्तमात् श्रमात् सेवाद्यायासात् गुरोः सकाशात् पदशः पदेन पदेनेति पदशः सुप्तिङंतादिरूपेण तत्वमस्यादिवाक्यरूपेण वा लभ्या ॥ गुरूपदिष्टवाक्योपदेशतो लभ्येत्यर्थः ॥ पदं शब्दे च वाक्ये च व्यवसायप्रदेशयोः ॥ पादतच्चिन्हयोरिति मेदिनी ॥ संख्यैकवचनाच्च वीप्सायामिति शस्प्रत्ययः ॥ ५२ ॥

ग० ॥ ततश्च कमपि विटपिप्रसवमरंदलोलुपं लोलंबमभिवीक्ष्यैवं विभुर्बभाषे ॥ २३ ॥

ततइति ॥ छायावर्णनाऽनंतरं विभुः श्रीकृष्णः विटपिनो वृक्षस्य प्रसवः पुष्पं तत्संबंधिनि मरंदे लोलुपः सतृष्णस्तं तथाविधं कमपि भगवत्कर्तृकवर्णनविषयतयाऽतिमहिमानं लोलंबं भ्रमरं अभिवीक्ष्य एवं वक्ष्यमाणप्रकारेण बभाषे ॥ २३ ॥

प० ॥ जडैकरेफोऽपि दलप्रयुक्तं सुवर्णमारोहति चाक्षरंचेत् ॥ आमोददं चेतन आध्यरुक्षत्सुमं द्विरेफः किमु चित्रमत्र ॥ ५३ ॥

तदाह ॥ जडैकेति ॥ जडः अचेतनः स चाऽसावेकरेफश्च सोऽपि दलप्रयुक्तं दले पत्रे प्रयुक्तं योजितंलिखितमितियावत् सुवर्णं शोभनमष्यादिवर्णविशिष्टं सुमं सुष्ठु मा आकृतिशोभा यस्य तथाविधं सुशोभं प्रायशो बाहुल्येन आमोददं वाचकानामतिहर्षदं अक्षरं वर्णं प्रति आरोहति चेत् ॥ लिप्यां रेफो हि वर्णशिरसि लिख्यते ॥ तर्हि इति शेषः चेतनः द्विरेफः दलप्रयुक्तं दलेषु पर्णे-

षु प्रयुक्तं संबद्धं सुवर्णं सुष्ठुवर्णौ यस्य तथाविधं अक्षरं न क्षरतीत्यक्षरं अनधोगलितं॥भ्रमरा हि वृक्षसंबद्धे एव पुष्पे आरोहंतिनत्वधोगलिते॥प्रायशो बाहुल्येन आमोददं सुगंधप्रदं सुमं पुष्पं आध्यरुक्षत् आरोहतिस्म अत्र चित्रं किमु न किमपीत्यर्थः जडस्याऽप्येकरेफस्याऽपि तथाऽऽरोहणे सति चेतनस्यद्विरेफस्यतथारोहणे न किमप्याश्चर्यमिति भावः॥एको रेफो यस्मिन्निति बहुव्रीहिः॥वस्तुतस्तु एकश्चाऽसौ रेफश्चेति वियहो बो-ध्यः ॥ उपजातिर्वृत्तं ॥ ५३ ॥

ततस्तदनुज्ञातः॥ प० ॥ रोधोवक्रा जानुदघ्नोदकं द्रागूचे ऽक्रूरो ऽक्रूरधी स्संप्रविश्य ॥ दृष्ट्वा वृंदिष्ठं सुराणां तदात्वे बध्वा श्रद्धातोऽजलिं ज्वालघृष्टिम् ॥ ५४॥

ततइति ॥ अनयोः पदयोरुत्तरत्राऽन्वयः ॥ रोधोवक्रेति ॥ ततो बलकृष्णयोर्भाषणानंतरं अक्रूरधीः शांतबुद्धिरक्रूरः तदनुज्ञातः बलश्रीकृष्णयोरनुज्ञया ताभ्यामनुज्ञात आज्ञप्तइतिवा रोधोवक्रा श्रीयमुनाख्या नदी ॥ कूलंकषा निर्झरिणी रोधोवक्रा सरस्वतीति नदीपर्यायेष्वमरः ॥ तस्या जानुदघ्नं जानुप्रमाणं यदुदकं तत्॥ प्रमाणे द्वयसजित्यादिना दघ्नच् प्रत्ययः ॥ संप्रविश्य तदात्वे तत्काले सुराणां देवानां मध्ये वृंदिष्ठं अतिशयेन वृंदारकः श्रेष्ठो वृंदिष्ठः तं देवेषु मुख्यतमं ॥ इष्ठन्प्रत्यये प्रियस्थिरेत्यादिना वृंदारकशब्दस्यवृंदादेशः॥वृंदारकौ रूपिमुख्यावित्यमरः॥तं ज्वालघृष्टिं सूर्यं दृष्ट्वा द्राक् झटिति श्रद्धातः अंजलिं बध्वा ऊचे उक्तवान् ॥ शालिनी वृत्तं ॥ ५४ ॥

मंदेहकुलजीवानां संदेहकरणक्षमम्॥ वंदे ऽहं सर्वभूतानां यं देवं साक्षिणं विदुः॥ ५५॥

तदाह ॥ मंदेहेति ॥ मंदेहानामसुराणां यत्कुलं तस्य ये जीवाः प्राणास्तेषां ॥ संदेहेति ॥ संदेहस्य संतिनवेति संशयस्य यत्करणं तद्विषये क्षमं समर्थं मंदेहकुलमूर्छाजनकं यं देवं सूर्यं सर्वभूतानां लक्षणया सर्वभूतकृतकर्मणां साक्षिणं साक्षाद्द्रष्टारं विदुः ॥ ऋषय इति शेषः ॥ उक्तंच ॥ आदित्यचंद्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं मनश्च ॥ अहश्च रात्रिश्च उभे च संध्ये धर्मस्य जानंति नरस्य वृत्तमिति ॥ तं देवं अहं वंदे ॥ ५५ ॥

तत्तनयामुद्दिश्यैवं निजगाद॥ प० ॥ डिंडीरैरर्जुनत्वं ते कृष्णत्वं वर्णतो यतः ॥ वाहिनीत्वं जलेनाऽस्ति भीष्माऽघौघं जिघांससि ॥ ५६ ॥

तदिति ॥ तस्य सूर्यस्य या तनया यमुना तां उद्दिश्येत्यादि स्फुटं तदाह ॥डिंडीरैरिति ॥हे श्रीयमुने डिंडीरैः फेनैः कृत्वा ते तव अर्जुनत्वं धवलत्वं अथच पार्थत्वं वर्णतः स्वाभाविकवर्णेन च कृष्णत्वं कृष्णवर्णविशिष्टत्वं अथच वासुदेवत्वं जलेनोदकरूपत्वेन कृत्वा वाहिनीत्वं वहति प्रवहतितच्छीला वाहिनी नदी तस्या भावस्तत्वं अथच सेनात्वं च यतः अस्ति ततः॥भीष्मेति॥ भीष्मो भयंकरो यः अघौघः पापौघस्तं अथच भीष्मो गांगेयस्तद्रूपं अघौघं दुःखसमूहं अतिमारकत्वात् जिघांससि हंतुमिच्छसि ॥ कृष्णार्जुनाभ्यामुभाभ्यां वाहिनीसहिताभ्यां भीष्मरूपाऽघौघहननं कृतं॥ अंहोदुःखव्यसनेष्वघमित्यमरः॥तव त्वेकस्या एवाऽर्जुनत्वकृष्णत्व-

वाहिनीत्वरूपधर्मत्रितयविशिष्टत्वाद्भीष्माघौघनाशनं सुकरमिति भावः ॥ भगवद्भक्तानां त्रैकालिकवृत्तस्य प्रत्यक्षगोचरत्वेन भाविनोऽपि भीष्मनाशनस्य बुद्धौ प्रत्यक्षत अविर्भावादेवमुक्तिः ॥ ५६ ॥

इत्थं किल॥ निगद्य सद्य स्समभज्ज तज्जले नमज्जनानामृषभो मणिप्रभे॥ विलोक्य नीरे सबलं हरिं तथा चित्रप्रवाहेऽपि तदा यदूद्वहः॥ ५७॥

इत्थं किलेति ॥ अनयोरुत्तरश्लोकेऽन्वयः ॥ निगद्येति ॥ नमदिति ॥ नमंतो ऽभिवादका भक्तास्ते चते जनास्तेषामृषभः श्रेष्ठो भक्तवर्यइत्यर्थः ॥ यदूद्वहः यदुनायकः ॥ यदुकुलहितकारित्वादेवं व्यपदेशः ॥ सोऽक्रूरः इत्थं पूर्वोक्तप्रकारेण निगद्योक्त्वा किल मणिप्रभे इंद्रनीलसमकांतौ तज्जले यमुनाजले ममज्ज मज्जनं कृतवान् ॥ तदा मज्जनसमयएव नीरे उदके सबलं हरिं श्रीकृष्णं विलोक्य च सद्यः तत्कालं तथा पूर्ववत् चित्रप्रवाहेऽपि आश्चर्यपूरेऽपि ममज्ज ॥ रथस्थौ तावत्र कथमित्याश्चर्यवानभूदित्यर्थः ॥ वंशस्थं वृत्तं ॥ ५७ ॥

चित्रप्रपूरं संभेत्तुं कालिंदीभेदिनो हरेः ॥ दर्शनादुन्ममज्जाऽपि ममज्जाऽस्मिन्नितोऽधिकम्॥ ५८॥

चित्रेति ॥ कालिंदीभेदिनो बलरामस्य हरेः श्रीकृष्णस्य च ॥ तीरे रथस्थितस्येत्यर्थः ॥ दर्शनात् चित्रप्रपूरं पूर्वजातमाश्चर्यपूरं संभेत्तुं सम्यक् भेत्तुं निरसितुमित्यर्थः ॥ उन्ममज्ज उपर्यगात् ॥ अपि एवमपि उपर्यागमनेपि अस्मिन्नाश्चर्यपूरे इतः पूर्वाऽपेक्षया अधिकं ममज्ज ॥ पूर्वाऽऽश्चर्यपूरभेदनार्थं बहिरागत्याऽपि रथस्थितौ तावेव पुनर्दृष्ट्वा कथमेतावुभयत्राऽपि दृश्येते इति पूर्वापेक्षयाऽप्यधिकं तत्र मग्नोऽभूदित्यर्थः ॥ अत्र कालिंदीभेदिन इति हरेरितिच पदद्वयोपादानात्तद्दर्शनस्य चित्रपूरभेदनसामर्थ्यं सूचितं॥ ५८ ॥

चित्रांऽधकारविच्छित्त्यै सूर्यजासलिले पुनः॥ श्वफल्कतनयः शीघ्रं मग्न आसीत्तदा किल॥ ५९॥

चित्रांधकारेति ॥ तदा किल श्वफल्कतनयो ऽक्रूरः ॥ चित्रेति ॥ चित्रमाश्चर्यमेवांऽधकारस्तस्य विच्छित्त्यै विच्छेदाय दूरीकरणायेति यावत् ॥ सूर्यजाया यमुनाया यत्सलिलं तस्मिन् पुनः शीघ्रं मग्न आसीत् ॥ अत्र सूर्यजेत्यनेन कार्ये कारणगुणसमन्वयनिश्चयात् तदवगाहनस्योक्तांऽधकारनिवर्त्तकत्वं सूचितं ॥ ५९ ॥

श्रीधरं श्रीधरं दृष्ट्वा श्रीधराधरणस्य सः॥ श्रीधरस्य तदोत्संगे मोदोत्कंटकित स्सुधीः॥ ६० ॥ एवमस्तौषीत्॥

ततः किमभूदित्याकांक्षायामाह ॥ श्रीधरमिति ॥ एवमितिच ॥ सुधीः सुष्ठु निर्मला धीर्यस्य स सुधीः॥ एतेन वक्ष्यमाण भगवद्रूपदर्शनाऽधिकारित्वं सूचितं॥सः अक्रूरः तदा मज्जनाऽनंतरसमये यमुनाजले श्रीधराधरणस्य धरतीति धरणः धराया धरणो धारकः श्रिया शोभया युक्तो यो धराधरणस्तस्य भूमिधारकस्य श्रीधरस्य श्रियो विषस्य धरो धारकस्तस्य शेषस्य उत्संगे कुंडलीकृतदेहार्द्धे श्रीधरं श्रियो वेषस्य कौमोदक्यादिविशिष्टस्य धरं धारकं श्रीयो लक्ष्म्या धरं धारकं श्रीनारायणं दृष्ट्वा मोदोत्कंटकितः

हर्षेण संजातरोमांचः सन् एवं वक्ष्यमाणप्रकारेण अस्तौषीत् ॥ श्रीर्वेषरचनाशोभासंपत्सरलशाखिषु ॥ वाणीलक्ष्मीलवंगेषु विषे बिल्वेऽपीति रत्नमाला ॥ ६० ॥

धीवरजनलभ्यत्वं त्वनिमिषवर्यत्वमप्यहो कर्तुं॥
स्पष्टं जलशायित्वं धृतझषवेषाय ते नमोऽस्तु सदा
॥ ६१ ॥

अथाऽक्रूरः सप्रयोजनमत्स्याद्यवताररूपेण भगवंतं स्तुवन् प्रथमं मत्स्यावतारं सप्रयोजनं वर्णयति ॥ धीवरेति ॥ अहो हे भगवन् ॥ धृतेति ॥ धृतोझषवेषो येन स तस्मै ॥ पृथुरोमा झषो मत्स्य इत्यमरः ॥ ते तुभ्यं सदा सर्वदा नमोऽस्तु ॥ मत्स्यवेषधारणे प्रयोजनमाह ॥ धीवरेत्यादि ॥ धीवरा मत्स्यवेधका ये जनास्तैर्लभ्यस्तस्य भावस्तत्वं ॥ श्लेषेण धिया बुध्या वराः श्रेष्ठा उत्तमबुद्धिशालिनो ये जना भक्तास्तैर्लभ्यस्तस्य भावस्तत्त्वं ॥ तु पुनः ॥ अनिमिषेति ॥ मत्स्यश्रेष्ठत्वं अथच देववर्यत्वं॥ सुरमत्स्यावनिमिषावित्यमरः ॥ तथा ॥ जलेति ॥ जले शेते ऽसौ जलशायी तस्य भावस्तत्त्वं अथचं क्षीरार्णवशायित्वं ॥ जलशायी विश्वरूपो मुकुंदोमुरमर्दन इत्यमरः ॥ एतत्सर्वं स्पष्टं कर्तुं ॥ ६१ ॥

वेदत्रयसंरक्षणदक्षिण दक्षिणदिशाप्रदात्रे ते ॥
रिपवे विभवे प्रभवे स्वयंभुवे मे नमांसि संतु स
दा॥ ६२॥

अथहयग्रीवाऽवतारत्वेन वर्णयति ॥ वेदेति ॥ हे वेदत्रयसंरक्षणदक्षिण वेदत्रयस्याऽसुरहृतस्य यत्संरक्षणं पुनः प्रत्यानयनेन यथा-

पूर्वं स्थापनं तद्विषये दक्षिणः कुशलस्तत्संबोधनं रिपवे वेदहारकाय असुराय यद्वा जात्यैकत्वादेकवचनं नानाविधाऽसुरेभ्यः ॥ दक्षिणेति ॥ दक्षिणा यमाधिष्ठिता या दिशा तत्प्रदात्रे शत्रुनाशकर्त्रे इत्यर्थः ॥ अतएव प्रभवे निग्रहाऽनुग्रहसमर्थाय यद्वा प्रभवे इति सप्तम्यंतं अवतारे सति उक्तकार्यकर्त्रे इत्यर्थः ॥ एवमपि परिच्छिन्नरूपत्वं तव नाऽस्तीत्याह ॥ विभवे व्यापकाय ॥ नन्वेवमपरिच्छिन्नस्य व्यापकस्यैवंविधपरिच्छिन्नरूपोपलब्धिः कथमित्यत आह ॥ स्वयंभुवे इति ॥ स्वयमेव भवतीति स्वयंभूस्तस्मै॥ स्वभक्तोद्धारार्थं स्वेच्छयैव तादृशरूपधारणं तवेति भावः ॥ एवंविधाय ते तुभ्यं सदा सततं नमांसि संतु ॥ ६२ ॥

धर्तुं धराधरं धीरः कूर्म एव जले पुनः॥ इति ता
दृक्षरूपाय ह्यमृतार्थं नमोऽस्तु ते॥ ६३॥

अथकूर्माऽवतारत्वेन स्तौति ॥ धर्तुमिति ॥ जले धराधरं पर्वतं मंदरं अथच धराधरं शेषं धर्तुं धीरः धैर्यशाली कूर्मएवाऽस्ति हि प्रसिद्धं ॥ धराधारकस्य शेषस्य कूर्माधारत्वं पुराणप्रसिद्धं ॥ इति हेतोः अमृतार्थं क्षीराब्धौ मंदरधराधरधारणपूर्वकममृतोपलब्धये तादृक्षरूपाय कूर्मरूपाय ते पुनर्नमोऽस्तु॥ अथवा तादृक्षरूपाय ते अमृतार्थं मोक्षार्थं नमोऽस्तु ॥ ६३ ॥

भूदारत्वं स्फुटीकर्तुं कोलरूपधराय ते॥ म्लेच्छम्ला
निप्रदायाऽपि नमः कल्किद्विजन्मने॥ ६४॥

अथ वराहाऽवतारत्वेन स्तौति ॥ भूदारत्वमिति॥ भूः पृथ्वी दाराः यस्य स भूदारस्तस्य भावो भूदारत्वं अथच भुवं दारयतीति भूदा

रो वराहस्तस्य भावस्तत्त्वं स्फुटीकर्तुं कोलरूपधराय वराहरूपधारिणे ते नमोऽस्तु ॥ क्रोडो भूदार इत्यपि ॥ कोलः पोत्री किरिः किटिरिति चाऽमरः ॥ अथ कल्क्यवतारत्वेन स्तौति ॥ म्लेच्छेति॥ अपिच कलौ म्लेच्छानां म्लेच्छप्रायाणां म्लानिं प्रददातीति तत्तथाविधाय कल्किद्विजन्मने कल्क्याख्यब्राह्मणरूपाय ते नमोऽस्तु ॥ उक्तंच श्रीमद्भागवते ॥ शंभलग्राममुख्यस्य ब्राह्मणस्य महात्मनः ॥ भवने विष्णुयशसः कल्किः प्रादुर्भविष्यतीति ॥ ६४ ॥

नृपुंडरीकाख्य इभेंद्रलीलं रिपुं कुशीलं शयनोपयुक्तं॥ क्षीरांऽबुराशौ शयनाऽऽदरोपि खरैर्नखाग्रैर्विददार चित्रम्॥ ६५॥

अथ नृसिंहाऽवतारत्वेन स्तौति ॥ नृपुंडरीकइत्यादिश्लोकद्वयेन॥ ना पुंडरीक इव नृपुंडरीकः नृपुंडरीकइति आख्या यस्य सः नृसिंहइत्यर्थः ॥ आश्चर्यपक्षे ना पुंडरीक मिवेति नृपुंडरीकमिति आख्या यस्य सः सितांऽभोजसदृशोऽतिकोमलोऽपि॥सोऽपि तथा क्षीरांऽबुराशौ क्षीरसमुद्रे शयनाऽऽदरः शयने आदरो यस्य स तथाविधोऽपि इभेंद्रलीलं इभेंद्रो गजश्रेष्ठस्तद्वल्लीला यस्य तं कुशीलं कुत्सितस्वभावं तथा शयनोपयुक्तं शयने शय्यायामुपयुक्तस्तं हिरण्यकशिपुनामकं रिपुं खरैस्तीक्ष्णैर्नखाग्रैर्विददारेति तच्चित्रं ॥ पुंडरीकं सितांऽभोजं ॥ व्याघ्रेऽपि पुंडरीको ना ॥ कशिपु त्वन्नमाच्छादनं द्वयमितिचामरः ॥ पुंडरीकसदृशेनाऽतिकोमलेन गजेंद्रसदृशस्याऽतिकठोरस्य शयनाऽऽदरशालिना च मंचा-

द्यलंकरणार्थत्वेन हिरण्यस्यास्तरणार्थत्वेन कशिपुनश्चोपयोगाद्धिरण्यकशिपोर्नखाग्रैर्विदारणमाश्चर्यकरमिति भावः ॥ उपजातिर्वृत्तं ॥ ६५ ॥

कायाधवस्य किल दुःखमसह्यमत्र मायाधवस्त्वमलुनाः कृपया कृपालुः॥ सा या ऽधुना तव कृपा दुरिताद्द्रुतं मां पायाद्यथा रिपुसुतं रिपुसंघमध्यात्॥ ६६॥

कायाधवस्येति ॥ हेभगवन् माया लक्ष्म्या धवः पतिस्त्वं अत्र अस्मिन् लोके कृपालुः सन् कायाधवस्य कयाधोरपत्यं कायाधवः प्रल्हादस्तस्याऽसह्यं सोढुमनर्हं दुःखं कृपया अलुनाः अनाशयः॥ किलेत्यैतिह्ये ॥ अधुना एवं प्रसिद्धा या तव कृपा सा बलतः स्वसामर्थ्येन द्रुतं शीघ्रं दुरितात् पापात् मां पायात् पातु ॥ कमिव ॥ रिपुसंघमध्यात् शत्रुसमुदायमध्यात् रिपुसुतं यथा प्रल्हादमिव ॥ तथाच रिपुसुतस्यैवंरक्षणकर्तुस्तव स्वीयस्य मम रक्षणं कैमुत्यसिद्धमिति भावः ॥ वसंततिलका वृत्तं ॥ ६६ ॥

खर्वः कुयाचको यस्तु कुदाता बध्य एव यः॥ इति सूचयितुं तादृक्कर्मकर्त्रे ऽस्तु ते नमः॥६७॥

अथ वामनावतारत्वेन स्तौति ॥ खर्वइति॥यस्तु कुयाचकः कुत्सितयाचनकर्ता स खर्वो नीचो भवति अथवा यः खर्वः स कुयाचको भवति यश्च कुदाता कुत्सितो दाता स च बध्य एव बंधनयोग्य एव भवति इति सूचयितुं तादृक्कर्मकर्त्रे तादृशोः कर्मणोः कुयाचनकुदातृबंधनयोर्यः कर्ता तस्मै ते नमोऽस्तु ॥अनेनैवं कर्म

न कर्त्तव्यमिति लोकशिक्षणं कृतमिति भावः ॥ तत्वतस्तु खर्वो वामनः॥कोः पृथ्व्या याचकः॥कोः पृथ्व्या दाता बलिः॥खर्वं संख्यांतरे क्लीबं नीचे वामनके त्रिष्विति मेदिनी॥ गोत्रा कुः पृथिवी-पृथ्वीत्यमरः ॥ ६७ ॥

छिद्यां स्वबाहुमिति यद्वाक्यं सत्यं विधातुमुग्राय॥क्षात्रक्षयकर्त्रे ते धर्त्रे रूपस्य वाडवेषु नमः ॥६८॥

अथ परशुरामाऽवतारत्वेन स्तौति ॥ छिद्यामिति ॥ हे भगवन् वाडवेषु ब्राह्मणेषु रूपस्याऽऽकारस्य धर्त्रे धारकायाऽपि क्षात्रक्षयकर्त्रे क्षत्रियसमूहक्षयकारिणे अतएवोग्राय क्रूराय ते परशुरामाय तुभ्यं नमोऽस्तु ॥ ननु ब्राह्मणत्वाऽवलंबने सत्येतादृशक्रूरकर्माऽवलंबनं कुत इत्याशंक्य तत्र कारणमुत्प्रेक्षते ॥ छिद्यामिति ॥ तृतीयस्कंधेसनकादीन् प्रति छिद्यां स्वबाहुमपि वः प्रतिकूलवृत्तिमित्येवंरूपं यत्स्ववाक्यं तत्सत्यं विधातुमिवेति गम्योत्प्रेक्षा ॥ अयं भावः॥ भगवद्दर्शनार्थं वैकुंठं प्रति गतैर्द्वारपालाभ्यां रुद्धैः सनकादिभिर्द्वारपालयोः शापे दत्ते सति तेषां प्रसादनार्थं हि भगवता पूर्वोक्तं प्रतिज्ञातं तदेवेदानीं बाहू राजन्य इति श्रुतिप्रतिपादितस्वबाहुरूपक्षत्रियविनाशनेन सफलं कर्तुमिवैतादृशं क्रूरत्वमवलंबितवानिति ॥ ६८ ॥

पंक्तिस्यंदननंदनोऽयमज यः ख्यातो यमाद्यं विदुर्येनाऽऽसीत् किल निर्ज्वरं जगदिदं राजन्वती मेदिनी॥ यस्मै शुद्धधियो हरंति सुबलिं भूपाश्च य

स्माज्जगद्दासा यस्य च मारुतिप्रभृतयो यस्मिन्मनो मे ऽनिशम् ॥ ६९ ॥

अथ रामाऽवतारत्वेन स्तौति ॥ पंक्तीत्यादिना ॥ हे अज जन्मरहित योऽयं त्वं पंक्तिस्यंदननंदनः दशरथतनयः ख्यातः प्रख्यातः असि ॥ यंच त्वां योगिन इति शेषः आद्यं सर्वकारणं विदुः ॥ येन भवता राज्ञा हेतुना जगत् निर्ज्वरं रोगोपद्रवरहितं आसीत्॥ तथा इयं मेदिनी पृथ्वी राजन्वती प्रशस्तो राजा अस्यामिति राजन्वती प्रशस्तराजयुक्ता आसीत् ॥ किलेति प्रसिद्धौ ॥ राजन्वान्त्सौराज्ये इति साधुः ॥ सुराज्ञि देशे राजन्वानित्यमरः ॥ यस्मै च भवते शुद्धधियो निर्मलबुद्धयो देवादयो भक्ता वा भूपा राजानश्च सुबलिं पूजोपहारादिकं करभारादिकं च हरंति॥यस्माच्च भवत इदं जगत् आसीदिति शेषः ॥ यस्य च भवतो मारुतिप्रभृतयो हनूमदादयो दासाः संति ॥ यस्मिश्च भवति मे मनः अनिशं निरंतरं अस्ति ॥ अत्र सप्तविभक्तीनां क्रमेण निर्देशश्चमत्कारः ॥ अत्र अजेति संबुद्धिरभिमुखीकरणार्थतया प्रथमं निर्दिष्टा ॥ यच्छब्दानामग्रिमेण तस्येत्यनेनाऽन्वयः ॥ शार्दूलविक्रीडितं वृत्तं ॥ ६९ ॥

ननु तस्य तव पदस्य॥तथोक्ते रजसा प्राप्तो ऽहल्यया लोभ एव सः ॥मात्राहीनतया तस्या लाभ आसीद्धि दुर्लभः॥ ७० ॥

नन्विति ॥ एषामुत्तरत्राऽन्वयः ॥ तथोक्तेरिति ॥ तस्य पूर्वोक्तस्य तव त्वत्संबंधिनः पदस्य चरणस्य संबंधिना रजसा कृत्वा अहल्य-

या गौतमपत्न्या लोभ एव प्राप्तः ॥ कुत इति चेत्तत्राह ॥ तथोक्तेः रजसो लोभ एव चेति गीतावाक्यात् ॥ परंतु सः लोभः मात्रा प्रसुवा हीनतया अथच मात्रया अक्षराऽवयवेन हीनत्वात् हेतोः तस्या अहल्यायाः दुर्लभ इतरैरलभ्यः लाभः हिरवधारणे लाभ एवाऽऽसीत् ॥ नन्विंतिवितर्के ॥ मात्रा कर्णविभूषायां वित्ते माने परिच्छदे ॥ अक्षरावयवे स्वल्पे क्लीबं कार्त्स्न्येऽवधारणे इति मेदिनी ॥ भगवत्पादरजसा अहल्याया मातुरुदरे स्थितिं विनैव पाषाणदेहत्यागपूर्वकं स्त्रीजन्मलाभात् इतराऽलभ्यो लाभ एवाऽभू दित्यर्थः ॥ लोभशब्दस्याऽपि मात्रया हीनत्वे लाभइत्येवरूपमिति तथोक्तं ॥ ७० ॥

किंच ॥ अशेषजगदाधारे शेषाऽऽधारे नमांसि मे ॥ दशाऽवतारकर्तर्य्यप्यस्मिंस्तद्रहिते त्वयि ॥ ॥ ७१ ॥

किंचेति ॥ अवतारित्वेन स्तौति ॥ अशेषेति ॥ अशेषस्य संपूर्णस्य जगत आधारे शेषोऽनंत आधारः शय्यात्वेन यस्य तस्मिन् शेषशायिनि ॥ अत्र अशेषाऽऽधारस्य शेषाऽऽधारत्वकथनेन विरोधाभासः ॥ परिहारस्तूक्तएव ॥ तथा ॥ दशेति ॥ दशानां मत्स्यादीनामवताराणां कर्तर्यपि तद्रहिते दशाऽवतारै रहिते इतिविरोधाऽऽभासः ॥ परिहारस्तु दशाः बाल्याद्यवस्थाः अवताराः कर्मानुरोधिजन्मानि च तद्रहिते इति ॥ दशाऽवस्थादीपवर्त्योरिति मेदिनी ॥ अस्मिन् दृग्गोचरे त्वयि त्वद्विषये मे नमांसि मत्तस्त्वमुत्कृष्टस्त्वत्तोऽहमपकृष्टइत्येवंबुद्धयः संतु ॥ कारकाणां विवक्षाधी-

नत्वाद्यदाऽधिकरणत्वेन विवक्षा तदा पूर्वोक्तबुद्धिसत्ताऽधिकरणत्वात्सप्तमी ॥ यदा तु संबंधमात्रविवक्षा तदा षष्ठीबाधिका नमः स्वस्तीत्यादिना चतुर्थी ॥ ७१ ॥

मुंडनमंडनदात्रे नास्तिकवर्गाय भर्गसदृशाय॥ पाषंडपंडितायाऽप्याशु नमांसि त्वनांसि सौख्यस्य ॥ ७२ ॥

अथ बौद्धावतारत्वेन स्तौति ॥ मुंडनेति ॥ पाषंडेति ॥ पाषंडेषु पंडितायाऽपि भर्गसदृशाय शंकरसदृशाय ते इति शेषः नमांसि संतु॥ असुरमोहनार्थं यथा शिवस्य पाषंडप्रवर्तकत्वं तथा तवाऽपीदं न वास्तवमिति भावः॥कीदृशाय ते ॥मुंडनेति ॥ नास्तिकवर्गाय मुंडनं केशलुंचनात्मकः संस्कारविशेषः स एव मंडनं दीक्षाग्रहणकाले प्रथमकर्तव्यत्वाद्भूषणं तस्य दात्रे ॥ कीदृशानि नमांसि ॥ सौख्यस्य अनांसि मातरः जनकानीत्यर्थः॥ अनः शकटमातरीत्यभिधानात्॥ मातृवाचकाऽनःशब्दप्रयोगस्तु मार्कंडेयपुराणांऽतर्गतदेवीमाहात्म्ये सा घंटा पातु नोदेवी पापेभ्योऽनः सुतानिवेत्यत्र प्रसिद्धः ॥ यद्वा सौख्यस्य अनांसि शकटाः॥ लोकोक्त्या अनेकविधसौख्यपरिपूर्णानीत्यर्थः ॥ ७२ ॥

किंच॥ गदीति चक्री व्यवहार आस्ते संसारहेतुः पतितेषु सोऽपि॥त्वय्यस्ति चित्रं परमेष भेदः कौमोदकीयश्च सुदर्शनीयः॥ ७३॥

किंचेति॥गदीति॥हे भगवात् त्वयि गदीति चक्रीति यो व्यावहारः आस्ते तिष्ठति॥ इतिशब्दो मध्यमणिन्यायेनोभयत्र संबध्यते ॥सः

गदीति चक्रीति व्यवहारः पतितेषु पातकिष्वप्यस्ति ॥ चित्रमेतत् ॥ परंतु पतितेषु गदो रोगो ऽस्याऽस्तीति गदी तथा चक्रं संसारचक्रमस्याऽस्तीति चक्री ॥यद्वा चक्रं दंभोऽस्याऽस्तीति चक्रीत्येवंरूपोव्यवहारः ॥ चक्रं प्रहरणे गणे इत्युपक्रम्य जलावर्त्ते दंभ इति हैमोक्तेः ॥ संसारहेतुः संसारः अहंताममतारूपः हेतुः कारणं यस्यैवंविधोऽस्ति ॥ त्वयितु कौमोदकीयः कौमोदकी गदा तत्संबंधी तथा सुदर्शनीयः सुदर्शनाख्यं यच्चक्रं तत्संबंधीति भेदः अस्ति ॥ गहादित्वाच्छः ॥ उपजातिर्वृत्तं ॥ ७३ ॥

चरणकमलमयि कृंतति शरणकमलमथो हि मंक्षु परम्॥ तत्खलु तथा पि दृश्यतइह मन्ये कंजवासिनीसदनम् ॥ ७४ ॥

चरणकमलमिति ॥ अयि भगवन् परं श्रेष्ठं चरणकमलं अर्थात्त्वेति गम्यते अथो कार्त्स्न्ये कृत्स्नं शरणकमलं अत्र शरण शब्देन शरणागतो लक्ष्यते ततः स्वार्थिकः कप्रत्ययः॥तस्य मलं पापं॥मलोऽस्त्री पापविट्किट्टानीत्यमरः॥अलमत्यर्थं मंक्षु शीघ्रं कृंतति छिनत्ति नाशयतीत्यर्थः॥हिरवधारणे॥अथच शरणं स्वशोभाया गृहरूपमाश्रयरूपमितियावत् एवंविधं यत् कमलं तत् अलं अत्यर्थं कृंतति छिनत्ति ॥ स्वस्य शोभाहारकत्वात् पराभवतीत्यर्थः ॥ तथाऽपि पराभवेसत्यपि तत्कमलं इह अस्मिन् त्वच्चरणे दृश्यते सामुद्रिकलक्षणरूपेणाऽवलोक्यते॥लोकैरिति शेषः॥खलुनिश्चये॥वर्णितं च वज्रांऽकुशध्वजसरोरुहलांछनाऽऽढ्यमिति श्रीमद्भागवते ॥ तत्कमलं कंजवासिन्या लक्ष्म्याः यत्सदनं गृहं तत् अस्तीति अहं मन्ये ॥ त्वच्चरणकमलेन पराभूतं कमलं शरणाऽऽगतत्वेन सर्वदा तत्रैव संलग्नं सत् लक्ष्मीगृहत्वमवापेति भावः ॥ ७४ ॥

ग० ॥ ततः परमेष कृष्णहृदयः प्रेमाऽमृतपर्याप्तस्सोमाऽन्ववायसोमः स्वकृतस्तोत्रस्तोम इव तद्विषयदर्शने परिसमाप्ते नित्यमपि कृत्यं प्रत्यवसाय्य तत्साद्गुण्यायेव हरे स्सान्निध्यमटीकत ॥ २४ ॥

एवमक्रूरकृतस्तुतिवचनान्यनूद्य कविराह ॥ ततइति॥ततः परं पूर्वोक्तप्रकारेण भगवत्स्तवनाऽनंतरं ॥ सोमेति ॥ सोमस्य चंद्रस्याऽन्ववायो वंशः॥वंशोऽन्ववायः संतान इत्यमरः ॥ तस्य सोमइव आल्हाददायकत्वात् एवंविधः अतएव ॥ प्रेमेति ॥ प्रेमैव भगवद्विषयकस्नेह एव अमृतं तेन पर्याप्तः परिपूर्णः अथवा प्रेमाऽमृतं परितः आप्तं येनैवंविधः ॥ प्रसिद्ध चंद्रोऽप्यमृतपूर्णः ॥ आहिताग्न्यादित्वान्निष्ठांतस्य परनिपातः ॥ तथा ॥ कृष्णेति ॥ कृष्णं हृदयं मनो यस्यैवंविधः ॥ चंद्रोऽपि कृष्णं कृष्णवर्णं हृदयं मध्यभागो यस्यैवंविधः सकलंकः ॥ एषः अक्रूरः ॥ स्वकृतेति ॥ स्वकृतो यः स्तोत्रस्तोमः स्तोत्रसमुदायस्तस्मिन्निव ॥ यथा स्वकृतस्तवनं परिसमाप्तं तथेत्यर्थः ॥ तद्विषयेति ॥ तस्य स्तोत्रस्य विषयो भगवान् तस्य यद्दर्शनं चाक्षुषज्ञानं तस्मिन् परिसमाप्ते सति ॥ भगवत्यंतर्हिते सतीत्यर्थः ॥ नित्यमपि कृत्यं संध्यावंदनादिरूपं प्रत्यवसाय्य समाप्य ॥ नित्यस्य समापनाऽनर्हत्वाद्विरोधाभासः ॥ परिहारस्तु नित्यं अकरणेप्रत्यवायजनकमावश्यकं माध्यान्हिकमित्यर्थइति॥ हरेः श्रीकृष्णस्य सान्निध्यं अटीकत प्राप्तः ॥ गत्यर्थाट्टीकृधातो-

लैङ् ॥ आगमने प्रयोजनमुत्प्रेक्षते ॥ तदिति ॥ तस्य कर्मणः साद्गुण्याय न्यूनातिरिक्तदोषपरिहारद्वारा तत्सांगतासिध्यै ॥ कर्ममात्रे हि साद्गुण्यार्थं समाप्तौ यस्यस्मृत्येत्यादिना विष्णुस्मरणं कुर्वंति ॥ इदानीं तस्य प्रत्यक्षतो विद्यमानत्वात्तत्संनिधावेवाऽऽगतवानिति भावः ॥ २४ ॥

तदवसरे प्रभुः ॥ दृष्ट्वा ससंभ्रममम़ुं यदुवर्यमुच्चैः
प्राहाऽऽर्य किं किमपि चित्रमहो व्यलोकि ॥ मन्ये
तथाविधमहं कथयस्व त्वद्यं यद्यंचनीय कथनीयमिदं त्वया त्वाम् ॥ ७५ ॥

तदवसरइति ॥ अनयोरुत्तरत्राऽन्वयः ॥ दृष्ट्वेति ॥ तदवसरे स्वसंनिधानाऽऽगमनसमये प्रभुः श्रीकृष्णः यदुवर्यं यादवश्रेष्ठं अमुं अक्रूरं ससंभ्रमं समौ संवेगसंभ्रमावित्यमरात् संभ्रमेण संवेगेन सहर्षत्वरयेति यावत् सहितः ससंभ्रमस्तमेवंविधं दृष्ट्वा उच्चैः इति प्राह ॥ इतिकिं ॥ अहो संबोधने ॥ हे आर्य अक्रूर त्वया किमपि चित्रं व्यलोकि किं अहं त्वां तथाविधं संभ्रमादिना चिन्हेन दृष्टचित्रं मन्ये ॥ हे अंचनीय पूज्य स्वस्य त्वदिभवं स्वत्द्यं स्वत्दयस्थितमिदं दृष्टमाश्चर्यं यदि कथनीयं कथनाऽर्हं तर्हि कथयेति॥ वसंततिलका वृत्तं ॥ ७५ ॥

तत् श्रुत्वाऽऽश्चर्यचर्यं तं यदुवर्यं यदूद्वहः ॥ अवद
त्वयि दृष्टे किं त्ववशिष्टं वदामि यत् ॥ ७६ ॥

तदिति ॥ तत् श्रीकृष्णोक्तं श्रुत्वा आश्चर्यचर्यं आश्चर्या आश्चर्य

कारिणी चर्या आचरणं यस्य तं यदुवर्यं तं श्रीकृष्णं प्रति इति अवदत् ॥ इतिकिं ॥ हिर्निश्चये त्वयि दृष्टे सति आश्चर्यं किमवशिष्टं अस्ति यदहं वदामि इति ॥ ७६ ॥

भो प्रभो ॥ यः क्षीराब्धौ शयननिरतो यं प्रधानं
समाहुर्लोके येन व्यरचि रचना रोचते प्रेम य
स्मै ॥ यस्मात्सौख्यं भवति निखिलं यस्य शक्ति
र्विचित्रा यस्मिन् सक्तो वसति ससुखं त्वं यशोदा
सुताऽसि ॥ ७७ ॥

भोइति ॥ अनयोरुत्तरत्राऽन्वयः ॥ यइति ॥ भो प्रभो यशोदासुत स त्वमसि ॥ स कः ॥ यः क्षीराऽब्धौ क्षीरसमुद्रे शयननिरतः ॥ योगिन इति शेषः यं प्रधानं परमात्मानं सदोत्तमं वा सम्यगाहुः ॥ प्रधानंस्यान्महामात्रे प्रकृतौ परमात्मनि ॥ प्रज्ञायामपि च क्लीबमेकत्वे तूत्तमे सदेति मेदिनीकोशात् ॥ लोके स्थावरजंगमात्मिका रचना येन कर्त्रा व्यरचि ॥ यस्मै प्रेम तल्लक्षणा भक्तिः रोचते ॥ यस्मादित्यारभ्य विचित्रेत्यंतं स्फुटं ॥ यस्मिन्भगवति सक्तः सुखं यथा स्यात्तथा वसति ॥ अत्रापि प्रथमादिविभक्तीनां क्रमेण निर्देशश्चित्रं ॥ मंदाक्रांता वृत्तं ॥ ७७ ॥

त्वमेव पूज्यो जगतां रेरिहाणो न पद्मजः ॥ यतोऽमृत
प्रदातत्वं दुग्धाऽब्धौ त्वयि विश्रुतम् ॥ ७८ ॥

त्वमेवेति॥हे भगवन् जगतां सुधार्थिनां मोक्षार्थिनांच जगदंतःपातिनां लोकानामित्यर्थः॥कर्तरिषष्ठी॥त्वमेव पूज्यः असि॥एवकारव्या-

वर्त्यमाह ॥ रेरिहाणः शंकरः पद्मजो ब्रह्मा च नपूज्यः॥शंभुर्भगाली कपिशाऽजनश्रीर्हरिः कटप्रूर्भरुरेरिहाणाविति त्रिकांडशेषः ॥ अत्रहेतुमाह ॥ यतइति॥ यतो हेतोः दुग्धाऽब्धौ क्षीराऽब्धौ अमृतप्रदातृत्वं धन्वंतरिरूपेण मोहिनीरूपेण च त्वय्येव विश्रुतं पुराणादिप्रसिद्धं अस्ति ॥ धन्वंतरिर्भगवान्वासुदेवइत्यनेन बोधितधन्वंतरिरूपेणाऽमृतकलशदानेन मोहिनीरूपेण परिवेषणाच्चाऽमृतदातृत्वं श्रीमद्भागवते प्रसिद्धं ॥ ७८ ॥

किंच॥सहस्रदललोचनः शिवसहस्रपत्रार्चने ऽददान्निजविलोचनं त्विति वदंति तेषां भ्रमः॥ तथाऽस्ति नहि संभवोयदि भवेद्विलोमो नदीं बिभर्ति विषमेक्षणस्तव पदोद्भवां भक्तितः॥ ७९ ॥

ननु भगवानपि सहस्रकमलैः शिवं पूजितवान् तत्रैककमलस्य न्यूनत्वे तत्परिपूरणार्थं स्वीयनेत्रकमलं समर्पितवान् इति पूर्वे वदंति एवंसति भगवत्पूज्यत्वस्य हरेऽपि प्रतीत्या कथमेतस्य सर्वाऽपेक्षया पूज्यत्वमित्याशंक्याह॥ किंचेति॥सहस्रेति ॥ सहस्रदले इव सहस्रपत्रकमले इव लोचने यस्य तथाविधो विष्णुः ॥ शिवेति ॥ शिवस्य शंकरस्य सहस्रपत्रैः कमलैर्यदर्चनं पूजनं तस्मिन् न्यूनतापरिहाराय निजविलोचनं स्वनेत्रकमलं अददात् ददाति स्मेति ये वदंति तेषां तु भ्रमोऽस्ति ॥ कुत इति चेत्तत्राह ॥ तथेति ॥ भगवता निजनेत्रकमलदानं कृतमिति संभवो नह्यस्ति ॥ यदि भवेत्तर्हि विलोमो विपरीतो भवेत् ॥ कुतो ऽसंभवः कुतश्च विपरीत इति चेत्तत्राह ॥ विषमेक्षणइति ॥ विषमाणि त्रीणि ईक्षणानि यस्य स विषमेक्षणः शिवः तव पदोद्भवां नदीं गंगां भक्तितो बिभर्ति शिरसा धारयति ॥ हरिपादोदकस्य शिरसा धारणेन हेतुना शिवस्य पूज्यो हरिरिति प्रतीत्या हरिपूज्यत्वस्य तस्मिन्नप्रतीत्या च शिवपूजने स्वनेत्रकमलार्पणस्य संभवोनाऽस्तीति यतश्च तस्मिन् विषमेक्षणत्वं हरौ च तदभावः अतो हरेणैव स्वनेत्रकमलाऽर्पणं कृतं स्यादिति विपरीतसंभवइति च भावः ॥ पृथ्वी वृत्तम् ॥ ७९ ॥

ग० अथेत्थंकारं स्तुतिकारस्साक्षात्काराश्रयमप्यधोक्षजं मधोः पुरं प्रापयितुं स धोरणाऽनुबद्धधौरेयप्रग्रहान् प्रगृह्य तान्प्रणोदयामास॥ ततश्चाऽतिपरिप्लुवतया स्वधृतकलधौताऽऽकल्पकलसिंजिततरलेक्षणानां नटव्राजनाऽटच्चटत्काराऽसहिष्णूनां स्तब्धोर्ध्वश्रवसां विष्णुपदसान्निध्यादिव कक्खटं कुतलमपि निजपदकैः सचंद्रं कुर्वतां पार्श्वधृतशरच्चंद्रांशुसंकाशचामरैर्ष्ययेव पुच्छैस्तत्क्रियामिव कुर्वतां शुचितामालिन्याऽऽतंकेनेव निःश्वासन्यक्कृतरजःपटलानां रयजिताऽऽजनेयानामाजानेयानां जवमालोक्य माधवमक्रूर एवमूचे॥ २५॥

अथेति ॥ इत्थंकारं पूर्वोक्तप्रकारेण स्तुतिकारः स्तुतिकर्ता सः अक्रूरः ॥ अन्यथैवं कथमित्यादिना इत्थं शब्दे उपपदे कृञो णमुल् ॥ साक्षात्काराऽऽश्रयमपि साक्षात्कारः प्रत्यक्षीकरणं तदाश्रयं

चक्षुषा साक्षाद्दृष्टमपि अधोक्षजं अक्षजमिंद्रियजन्यं ज्ञानं अ-
धः अक्षजं यस्मादित्यधोक्षजस्तं इंद्रियजन्यज्ञानाऽविषयमित्य-
र्थः ॥ परांचि खानि व्यतृणत्स्वयंभूः ॥ यतो वाचो निवर्त्तंते अ-
प्राप्य मनसा सहेति कठतैत्तिरीय श्रुतिभ्यां ॥ इति विरोधाभा-
सः ॥ परिहारस्तु स्वेच्छावशात् साक्षात्काराश्रयं ॥ अथवा लौ-
किकेंद्रियजन्यज्ञानाविषयमिति ॥ एवंविधं श्रीकृष्णं मधोः पुरं
मथुरां प्रति प्रापयितुं ॥ धोरणेति ॥ धोरणे वाहने रथे अनुबद्धा
ये धौरेया अश्वास्तेषां प्रग्रहान् रश्मीन् प्रगृह्य तानश्वान् प्रणो-
दयामास प्रेरितवान् ॥ सर्वं स्याद्वाहनं यानं युग्यं पत्रं च धोर-
णमित्यमरः ॥ ततश्चेति ॥ ततः प्रेरणानंतरमक्रूरः आजानेयानां
कुलीनाश्वानां ॥ आजानेयाः कुलीनाः स्युरित्यमरः ॥ आजा-
नेयलक्षणमश्वशास्त्रे ॥ शक्तिभिर्भिन्नहृदयाः स्खलंतश्च पदेपदे
आजानंति यतः संज्ञामाजानेयास्ततः स्मृता इति॥जवं वेगं आ-
लोक्य माधवं श्रीकृष्णं प्रति एवं वक्ष्यमाणप्रकारेण ऊचे उक्तवा-
न् ॥ कीदृशानामाजानेयानां ॥ अतीत्यादि ॥ अति अत्यंतं या
परिप्लवता चांचल्यं तया ॥ चंचलं तरलं चैव पारिप्लवपरिप्लवे
इत्यमरः ॥ स्वेति ॥ स्वधृता ये कलधौताऽऽकल्पाः स्वर्णभूषणा-
नि ॥ कलधौतं रूप्यहेम्नोरित्यमरः ॥ आकल्पस्तु मंडने ॥ कल्पने
चाऽपीति हैमः ॥ तेषां यानि कलसिंजितानि अव्यक्तध्वनयस्तै-
स्तरलानि चंचलानि ईक्षणानि येषां तेषां॥ जातिमतां चपलानाम-
श्वानांकिंचिदपि ध्वनिश्रवणे नेत्रतारल्यं भवतीति प्रसिद्धं॥तथा॥
नटदिति ॥ नटन्नित्यग्रप्राजनं तोत्रं ॥ प्राजनं तोदनं तोत्रमित्यम-
रः ॥ तस्मादटन्निर्गच्छन् यश्चटत्कारः शब्दविशेषस्तस्याऽसहिष्ण-

वो ऽसहनशीलास्तेषां तोत्रशब्दमप्यसहमानानां ॥ एतेन तो-
त्रप्रहाराऽनपेक्षं तेषां गमनमिति सूचितं ॥ तथा ॥ स्तब्धे स्थिरे
ऊर्ध्वे श्रवसी कर्णौ येषां तेषां ॥ तथा ॥ विष्णुपदेत्यादि ॥ विष्णोः
पदं चरणं तत्सान्निध्यादिवेत्युत्प्रेक्षा ॥ श्लेषेण गतिवशादाकाश-
सान्निध्यात् ॥ कक्खटेति ॥ कक्खटं कठिणं कुतलं पृथ्वीतल
मपि ॥ कक्खटं कठिनं क्रूरमित्यमरः ॥ निजपदंकैः स्वपादचि-
न्हैः सचंद्रं चंद्रसहितं कुर्वतां ॥ विष्णुपदे चंद्रसद्भावं तत्सान्निध्या-
द्दृष्ट्वा अस्मदाश्रयभूतभूमावपि तत्सद्भावोऽपेक्षित इति विचार्यैव
स्वखुरचिन्हैश्चंद्रसद्भावं भूमावपि कुर्वतामित्यर्थः ॥ तथा ॥ पार्श्वे-
ति ॥पार्श्वयोरुभयोर्धृते शरच्चंद्रांऽशुसंकाशे शारदचंद्रकिरणसदृशे
अतिधवले ये चामरे तयोरीर्ष्ययेवेत्युत्प्रेक्षा ॥ पुच्छैर्लांगुलैस्त-
त्क्रियामिव चामरसंबंधिनीं क्रियामितस्ततश्चालनरूपां कुर्वतां ॥
तथा ॥ शुचितेति ॥ शुचिता निर्मलता शुभ्रता वा तस्या यन्मा-
लिन्यं गमनोत्धूतरजोहेतुकं मलिनत्वं तस्याऽऽतंकेनेव भयेनेव ॥
निःश्वासेति ॥ निःश्वासैर्न्यक्कृतं तिरस्कृतं रजःपटलं धूलिवृंदं यै-
स्तथाविधानां ॥ तथा ॥ रयेति ॥ रयेण वेगेन जितः आंजनेयो
मारुतिर्यैस्तथाविधानाम् ॥ २५ ॥

प० ॥ चंचत्खुराऽग्रपरिचुंबितमेदिनीनां वेगैस्तु प
त्रमिवपत्रमिदं सुवातैः ॥ गच्छत्यदूरमिह दूरगतं
च येनपार्श्वस्थितं किल सुदूरमभूद्धयानाम् ॥
॥ ८० ॥

चंचदिति ॥ हयानामश्वानां वेगैः इदं पत्रं वाहनं स्यंदनः ॥ पत्रं

वाहनपक्षयोरित्यमरः ॥ गच्छति ॥ किमिव ॥ सुवातैः उत्तमैर्वातैः नतु चक्रवातैः सुपत्रमिव शोभनं पर्णमिव॥एतेन वायोः पत्रवहन-इव अश्वानां स्यंदनवहने आयासाभावोऽतिवेगश्च सूचितः ॥ कीदृशानां हयानां ॥ चंचदिति ॥ चंचंति यानि खुराग्राणि तैः परिचुंबिता नतु सम्यक्स्पृष्टा मेदिनी यैस्तेषां ॥ समासांतविधेरनि-त्यत्वान्नकप् ॥ वेगमेव निरूपयति ॥अदूरमित्यादि ॥येन रथवेगेन इह भूमौ दूरगतं अदूरमभूत् ॥ पार्श्वस्थितं च सुदूरमभूत् किल ॥ वसंततिलका वृत्तं ॥ ८० ॥

कर्णेक्षणचांचल्यं तेषामपि पादवृंदसंस्थमभूत्॥ नो चेत्कथमत्राऽस्मिंस्तब्धत्वं चंचलत्वमपि युगपत्॥ ८१ ॥

कर्णेक्षणेति ॥ एषामश्वानां कर्णेक्षणचांचल्यमपि पादद्वंदसंस्थ-मभूत् ॥ एवंविधो विनिमयो नो चेत् अत्र स्थितिकालावच्छेदेन चांचल्यशालिनि कर्णेक्षणे स्तब्धत्वं अस्मिन् स्थितिकालाव-च्छेदेन स्तब्धत्ववति पादद्वंद्वे चंचलत्वमपि युगपदेकसमयावच्छे-देन कथं जातं ॥ यत एतदभूत् अतः पूर्वोक्तो विनिमयो युक्त इति भावः ॥ एतेन धावनवेलायामक्षिकर्णस्तब्धीभाव उत्तमा-श्वस्य स्वभावः सूचितः ॥ ८१ ॥

किंच॥ विषधरविषदिग्धेयं क्षितिरिति किं संशयालुमनसैते॥ स्यंदनधुरां वहंतो धौरेयाः स्पर्शनं त्यजंत्यस्याः ॥ ८२ ॥

अथ वेगवशादश्वानां भूतलाऽस्पर्शित्वमुत्प्रेक्षापूर्वकं वर्णयति ॥

किंचेति ॥ विषेति ॥ स्यंदनधुरां वहंतः एते धौरेयाः अश्वाः इयं क्षितिः पृथ्वी ॥ विषधरेति ॥ विषधराः शेषादयस्तेषां यद्विषं तेन दिग्धा लिप्ता शेषशिरसि स्थितत्वात् तद्विषलिप्तास्या दिति संशया-लुमनसा संशयितेन मनसा हेतुना किं अस्याः पृथ्व्याः स्पर्शनं त्यजंति ॥ ८२ ॥

अथ तदानीं ॥ जलधरध्वनिधीररथाऽऽरवश्रवणजाऽतिसुखैर्मुखरीकृते॥ किल शिखंडिकुले घनशाखिनो भ्रममदुर्जलदस्य पथि प्रियम्॥ ८३॥

अथ तदानीमिति ॥ अथाऽक्रूरभाषणाऽनंतरं॥ तदानीं गमनवेला-यां ॥ अनयोरुत्तरत्र संबंधः ॥ जलधरेति ॥ अथ तदानीं किल पथि मार्गे शिखंडिकुले मयूरसमूहे ॥ जलधरध्वनीति ॥ जल-धरध्वनिवत् मेघध्वनिवत् धीरो गंभीरो यो रथाऽऽरवो रथध्वनि-स्तस्य श्रवणाज्जातानि यानि अतिसुखानि तैः मुखरीकृते वा-चालीकृते सति घनशाखिनः घना निबिडा ये शाखिनो वृक्षास्ते ॥ घनेत्यनेन च्छायाबाहुल्यं सूचितं ॥ प्रियं हृद्यं जलदस्य मेघस्य भ्रमं अदुः ददतिस्म ॥ अर्थाज्जनेभ्यः ॥ रथ-ध्वनौ मेघध्वनिभ्रमेण मयूराणामानंदोदयदर्शनेन घनवृक्षच्छा-यादर्शनेन च जनानां मेघभ्रमो जात इति भावः ॥ द्रुतविलंबितं वृत्तं ॥ ८३ ॥

ग० ॥ तदनंतरं तत्क्षणमसौ सहस्रोस्रसुतसरित्सलिलसरसिजशतस्रवत्सुमरंदबिंदुमसृणस्रोत्सा

रिततत्परागसंवलितस्वाऽऽश्लिष्टशाखिसंदोहसुम
नस्सुगंधसुरभिलसुमंदसमीरणसरणरमणशर्मदं
तत्समीरितस्वस्यंदनध्वजांऽशुकमर्मरश्रवणनिर्मि
तविनोदं निबिडसरलरसालकदंबकालस्कंधका
ष्ठीलांऽकोटाऽऽक्षोटाऽगरुशिंशपाशिंशुपांऽबष्ठामा
लतीमल्लिकाचंपकपाटलबकुलबहुलजालरंध्रं संप्र
विश्य सत्वरं करैश्छायां संश्लेष्टुमिव सहस्रकरेण
कृततत्प्रसारं निजकुटिलाऽलकनिकरसुषमाभरं जे
तुमिवस्ववदननालजलजमास्वादयितुमिव च स
मागतैर्भ्रमद्भृंगनिकुरंबैर्मेचकीकृताऽवकाशं किंकि
काकलीकलितकेकिकेकाकोकिलकलरवकलरव
किर्मीरितकारंडवकादंबजलकुक्कुटाऽग्निमशकुंतकु
लकलकलकलकलितमविच्छिन्नाऽऽच्छोदनावि
च्छेदस्वच्छंदनिरातंकश्वापदसंचरणसंश्लाघ्यं पथ
प्रकटोत्कटरथध्वनिश्रवणसंजातदिदृक्षाऽऽगतनि
कटग्रामग्रामनिवासिकुतूहलाऽऽस्पदं निजपदें
दीवरप्रस्पर्शप्रमुदिताक्षितिरोमस्तोमैरिव तृणैः कृ
तहरिद्वर्णप्रदेशं काननं निजेक्षणनिपुणपरिचरण
रमणीयं यदुकुलमणिः कुर्वन्॥ २६॥

प० ॥ मधूपघ्नपुरं प्राप मधुघ्नो विघ्ननाशकः ॥ भ
क्त्युपघ्नोऽमरान्भक्तान्निघ्नतां कृंतनाय सः॥ ८४ ॥

अथ मार्गसंबंधिवनाऽवलोकनपूर्वकं मथुराप्रवेशमाह ॥ तदनंतर-
मिति गद्यसहितेन मधूपघ्नेतिश्लोकेन ॥ तदनंतरं यमुनातीरप्रदे-
शात् निर्गमनानंतरं मधुघ्नः मधुं दैत्यं हंतीति मधुघ्नः ॥ अनेन कं-
सहनने आयासाभावः सूचितः ॥ तथा ॥ विघ्नविनाशकः ॥ अ-
नेन मार्गे विघ्नाभावः सूचितः ॥ तथा ॥ भक्त्युपघ्नः भक्तेरुपघ्नोंऽ-
तिकाऽऽश्रयः ॥ स्यादुपघ्नोंऽतिकाश्रय इत्यमरः ॥ अनेन भक्तवश-
वर्तित्वं सूचितं ॥ यदुकुलमणिः यदुकुलस्य मणिरिवाऽलंकारभू-
तइत्यर्थः ॥ सोऽसौ श्रीकृष्णः काननं वनं ॥ निजेति ॥ निजे स्व-
कीये ये ईक्षणे नयने तयोर्निपुणं यत्परितश्चरणं संचारस्तेन रम-
णीयं रम्यं कुर्वन् सन् ॥ स्वतोरमणीयमपि तद्वनं स्वाऽवलोकनेन
परमरमणीयं कुर्वन्नित्यर्थः॥भक्तानमरान् देवान् निघ्नतां कंसादी-
नां कृंतनाय च्छेदनाय नाशायेति यावत् मधूपघ्नपुरं मथुरापुरं
प्रति ॥ मथुरा तु मधूपघ्नमिति त्रिकांडशेषः ॥ तत्क्षणं अ-
विलंबेन प्राप ॥ कीदृशं वनं ॥ सहस्रोस्रेति ॥ अत्रत्य स्वशब्देन
वायुर्गृह्यते ॥ सहस्रं उस्राः किरणा यस्य स सहस्रोस्रः सूर्यस्तस्य
सुता या सरिद्यमुना तत्संबंधि यत्सलिलमुदकं तस्मिन्यत्सरसिजा-
नां कमलानां शतं तस्मात्स्रवंतो गलंतो ये शोभना मरंदबिंदव-
स्तैर्मसृणः स्निग्धश्च स्वेन उत्सारितो यस्तेषां सरसिजानां परागस्ते-
न संवलितो मिश्रश्च स्वेनाऽऽश्लिष्टा आलिंगिताः संस्पृष्टा इति
यावत् एवंविधा ये शाखिनो वृक्षास्तेषां यः संदोहस्समूहस्तत्संबं-
धिन्यो याः सुमनसः पुष्पाणि तत्संबंधी यः सुगंधस्तेन सुरभिलश्च

सुतरामत्यंतं मंदश्च यः समीरणो वायुस्तस्य यत्सरणं संचारस्तेन कृत्वा रमणविषये शर्मदं सुखदं ॥ समासांऽतर्गतैर्वायुविशेषणैः शैत्यसौगंध्यमांद्यादयस्तद्गुणा दर्शिताः॥ तथा ॥ तदिति ॥ तेन वायुना समीरितं प्रकंपितं यत्स्वस्य श्रीकृष्णस्य स्यंदनसंबंधि ध्वजांशुकं तत्संबंधी यो मर्मरो ध्वनिस्तस्य यत् श्रवणं तेन निर्मितो विनोदो यस्मिस्तत् ॥ तथा ॥ निबिडेत्यारभ्य प्रसारमित्यंतं ॥ सहस्रकरेण सूर्येण कृततत्प्रसारं कृतस्तेषां कराणां प्रसारो यस्मिस्तत् ॥ करप्रसारे प्रयोजनमुत्प्रेक्षते ॥ निबिडेति ॥ सरलप्रभृतिबकुलांता वृक्षास्तन्मध्येंऽबष्ठामालतीमल्लिका लताः ॥ सरलो देवदारुः रसालआम्रः कदंबः प्रसिद्धः कालस्कंधस्तमालः काष्ठीलाकदली अंकोटः पिस्ताइतिप्रसिद्धः आक्षोटः अक्रोडेति अखोडेतिचप्रसिद्धः अगरुःशिशपासिसवेतिप्रसिद्धः शिशुपाशिताफळीतिप्रसिद्धः अंबष्ठायूथिकाजुईतिप्रसिद्धा मालतीजातिः मल्लिकामोगरीतिप्रसिद्धा चंपकपाटलबकुलाः प्रसिद्धाः एतेषां द्वंद्वे निबिडानि तेषां बहुलानि जालानि समूहास्तेषां रंध्रमवकाशं सम्यक् प्रविश्यं च्छायां अनातपं अथच स्वप्रियां करैः किरणैः अथच हस्तैः सत्वरं संश्लेष्टुमिव आलिंगितुमिवेति ॥ तथा ॥ निजेत्याद्यवकाशमित्यंतं ॥ समागतैः प्राप्तैः ॥ भ्रमदिति ॥ भ्रमंतो ये भृंगास्तेषां निकुरंबैः समूहैः मेचकीकृतावकाशं मेचकीकृतः श्यामीकृतः अवकाशो यस्मिस्तत् ॥ भृंगाऽऽगमने उत्प्रेक्षितं प्रयोजनद्वयं तत्राऽऽद्यमाह ॥ निजेत्यादि ॥ निजः कृष्णसंबंधी यः कुटिलाऽलकानां चूर्णकुंतलानां निकरः समूहस्तत्संबंधिनं सुषमाभरं परमशोभातिशयं जेतुमिव ॥ द्वितीयंप्रयोजनमाह ॥ स्वे-

ति ॥ स्वस्य कृष्णस्य यद्वदनं तदेव नीलजलजं नीलकमलं तदास्वादयितुमिवच ॥ तथा ॥ किकीति ॥ चाषो दिविः किकिः स्मृतइति व्याडयुक्तेः किकयश्चाषास्तेषां याः काकल्यः सूक्ष्मध्वनयस्ताभिः कलिता युक्ताः याः केकिकेका मयूरध्वनयस्ताश्च कोकिलाश्च कलरवाः पारावताश्च तेषां ये कलरवा अव्यक्तमधुरध्वनयः तैः किर्मीरिता मिश्रिता इति कलकला इत्यस्य विशेषणं ॥ कारंडवाः कर्डुवेतिप्रसिद्धाः पक्षिविशेषाः कादंबाः कलहंसाः जलकुक्कुटाश्च अमिमा मुख्या येषु ते च तेशकुंताः पक्षिणस्तेषां यत्कुलं तस्य कला अव्यक्तमधुरा ये कलकलास्तैः कलितं युक्तं ॥ तथा ॥ अविच्छिन्नेति ॥ अविच्छिन्नोऽविरतो य आच्छोदनस्य मृगयाया विच्छेदो राहित्यं तेन हेतुभूतेन स्वच्छंदं निरातंकं निर्भयं च यत् श्वापदानां मृगादीनां संचरणं तेन सम्यक् श्लाघ्यं ॥ आच्छोदनं मृगव्यं स्यादाखेटो मृगया स्त्रियामित्यमरः ॥ तथा ॥ पथप्रकटेत्यादि॥वाटः पथश्च मार्गश्चेति त्रिकांडशेषात्पथे मार्गे प्रकटः स्पष्टः उत्कटो यो रथध्वनिस्तस्य श्रवणेन संजाता यादिदृक्षा कस्यायंध्वनिरिति द्रष्टुमिच्छा तया आगता ये निकटग्रामाणां ग्रामे समूहे निवासिनो जनास्तेषां यत्कुतूहलं अदृष्टपूर्वरामकृष्णतद्रथादिदर्शनजन्यं कौतुकं तस्याऽऽस्पदं स्थानं ॥तथा॥निजेत्यादिप्रदेशमित्यंतं ॥ तृणैः हरितैरित्यर्थः ॥ कृतेति ॥ कृतः हरिद्वर्णो यस्य तादृशः प्रदेशो यस्मिस्तत् ॥ तृणविषये उत्प्रेक्षते ॥ निजेति ॥ निजं श्रीकृष्णसंबंधि यत्पदिंदीवरं चरणकमलं तस्य प्रस्पर्शेन प्रकृष्टस्पर्शेन प्रमुदिता या क्षितिः पृथ्वी तस्या रोमस्तोमैरिव रोमांचसमूहैरिव ॥ २६ ॥ ८४ ॥

विचारस्य विचारस्य विचारस्य वशं गतैः ॥ से
व्यमानं स्थलं प्राप नंदाद्यैस्स बलान्वितः॥८५॥

विचारस्येति ॥ बलान्वितोबलरामयुक्तः सः श्रीकृष्णः नंदाद्यैः सेव्यमानं स्थलं प्राप ॥ कीदृशैर्नंदाद्यैः ॥ विचारस्य चरणं चारो गमनं लक्षणया गमनसाधनं विः पक्षी गरुडश्चारो गमनसाधनं यस्य तथाविधस्य गरुडगामिनः विः कालश्चारोर्गतिर्यस्येतिवा विना गरुडेन चारो गति र्यस्येति व्यधिकरणबहुव्रीहिर्वा ॥ श्रीकृष्णस्य संबंधिनः विचारस्य वेः कालस्य चारोऽतिक्रमणं तस्य आगमने कालविलंबस्येत्यर्थः ॥ तत्संबंधिनोविचारस्य चिंतनस्य वशं आयत्तत्वं गतैः प्राप्तैः ॥ कृष्णस्याऽऽगमने कालविलंबः कुत इति विचारयद्भिरित्यर्थः ॥ विरनेहसि पक्षिणीति शब्दार्णवः ॥ वशा वंध्यासुतायोषास्त्रीगवीकरणीषु च ॥ त्रिष्वायत्ते क्लीबमायत्तत्वे चेच्छाप्रभुत्वयोरिति मेदिनी ॥ ८५ ॥

ग० ॥ ततः परं पुरःपुटभेदनं परमरमणीयं नेत्रस
रणिसरणं विधायाऽयोऽग्रपाणिरेवमभाणीत् ॥
॥ २७॥

ततइति ॥ ततः परं नंदाद्यधिष्ठितस्थानगमाऽनंतरं ॥ अयोऽग्रपाणिः अयोऽग्रं मुसलं पाणौ यस्य सः बलरामः ॥ अयोऽग्रंमुसलोऽस्त्री स्यादित्यमरः ॥ पुरोऽग्रभागे परमरमणीयं पुटभेदनं मथुराख्यपत्तनं ॥ पत्तनं पुटभेदनमित्यमरः ॥ नेत्रेति ॥ नेत्रयोर्या सरणिर्मार्गस्तस्मिन् सरतीति नेत्रसरणिसरणं तथाविधं विधाय

कृत्वा ॥ अग्रे मथुरापुरं दृष्ट्वेत्यर्थः ॥ एवं वक्ष्यमाणप्रकारेणाऽभाणीत् उक्तवान् ॥ २७ ॥

प० ॥ मत्वांऽतरं यदुपुरं निजदुर्गभित्तेः सौधाग्र
मस्तमिदमुच्चमितो विधाय॥ चंचल्ध्वजोन्नतभुजे
न समाव्हयत्किं शीघ्रं हरिं परिविराजति कंसशां
त्यै॥ ८६ ॥

तदाह ॥ मत्वेति ॥ इदं पुरोवर्ति यदुपुरं मथुरानगरं निजदुर्गभित्तेः निजदुर्गस्य स्वप्राकारस्य या भित्तिस्तस्याः हेतुभूतायाः अंतरं भगवद्दर्शनव्यवधानं मत्वा॥अंतरमवकाशाऽवधिपरिधानांऽतर्धिभेदतादर्थ्ये इत्यमरः॥इतोऽस्मिन्प्रदेशे सौधाऽग्रमस्तं सौधस्य राजसदनस्य अग्रमेव मस्तं मस्तकं उच्चं विधाय॥चंचदिति॥चंचन् चंचलो यो ध्वज स्स एवोन्नत उच्चीकृतो भुजस्तेन कंसशांत्यै कंसस्य नाशं कर्तुं ॥ तुमर्थे चतुर्थी ॥ शीघ्रं हरिं श्रीकृष्णं समाव्हयत्याकारयतीतिसमाव्हयत् आकारयत् सत् किमित्युत्प्रेक्षा ॥ परिविराजति समंतात् शोभते ॥ हरिमित्यनेन खलसंसर्गजनितकुदोषहरणसमर्थत्वं तस्मिन् बोधितं ॥ वसंततिलका वृत्तं ॥ ८६ ॥

परिखापयःपयोजैर्भातिपुरीयं व दर्शनाय हरेः ॥
प्राप्ता सहस्रदृक्कां वज्रकरा संस्तुता निलिंपगणैः
॥८७॥

परिखेति ॥ इयं पुरी हरेः श्रीकृष्णस्य दर्शनाय परिखाया यत्पय उदकं तत्संबंधीनि यानि पयोजानि कमलानि तैः कृत्वा स-

हस्त्रं दृशो यस्या स्सा तस्या भावस्तत्ता तां अथच सहस्राक्षत्वं इंद्रत्वं प्राप्ता व प्राप्तेव भाति ॥ वशब्द इवार्थः ॥ व वा यथा तथैवैवं साम्ये इत्यमरात् ॥ स्वसंबंधिखलसंसर्गप्रत्युक्तोपद्रवहरणसमर्थं हरिं द्रष्टुं द्वाभ्यां नयनाभ्यामपरितुष्यंती परिखासंबंधिकमलरूपाणि सहस्रनेत्राण्यंगीकृतवतीवेति भावः ॥ कीदृशी पुरी ॥वज्रकरा वज्राणां प्राकारादिखचितहीरकाणां कराः किरणा यस्यां सा यद्वा वज्राणां कराः वज्रकरास्तद्वती ॥ अर्शआद्यच् ॥ अथच वज्रहस्ता ॥ वज्रोऽस्त्री हीरके पवावित्यमरः ॥ तथा ॥ निर्लिपगणैः कमलस्थितभ्रमरगणैः अथच देवगणैः ॥ शोभा निर्लिपा द्युसद इति देवपर्यायेषु त्रिकांडशेषः ॥ संस्तुता परिचिता पक्षे सम्यक् स्तुता ॥ संस्तवः स्यात्परिचय इत्यमरः ॥ ८७ ॥

दुर्गाऽऽश्लिष्टा हीनैर्युक्ता नित्यं श्रिया सुवाहिन्या॥ वृषसुखदोग्राऽभिख्या भाति पुरीयं शिवस्य मूर्तिरिव॥ ८८ ॥

दुर्गेति ॥ इयं पुरी मथुरा शिवस्य मूर्तिरिव भाति ॥ कीदृशी मथुरा शिवस्य मूर्तिश्च ॥ दुर्गाऽऽश्लिष्टा दुर्गेण प्राकारेणाऽऽश्लिष्टा पक्षे दुर्गया पार्वत्या आश्लिष्टा ॥ तथा ॥ नित्यं अहीनैरुत्तमैर्जनैर्वस्तुभिर्वा पक्षे अहीनां सर्पाणामिनाः स्वामिनो वासुक्यादयस्तैः भूषणभूतैः श्रियाशोभया पक्षे विषेण सुवाहिन्या उत्तमनद्या यमुनया सेनया वा पक्षे स्वर्गंगया च युक्ता ॥ तथा वृषसुखदा मुक्तिपुरीत्वाद्धर्मसुखदात्री पक्षे वृषस्य स्ववाहनभूतस्य वृषभस्य

सुखदा ॥ शुक्ले मूषिके श्रेष्ठे सुकृते वृषभे वृषइत्यमरः ॥ तथा ॥ उग्राभिख्या विनाऽपि प्रत्ययं पूर्वोत्तरपदयोर्लोप इत्यनुशासनात् उग्र उग्रसेनस्तस्य उग्रः क्रूरः कंसस्तस्य वा उग्राः असुरास्तेषां वा अभिख्या शोभा यस्यां सा ॥ पक्षे उग्रइति अभिख्या नाम यस्याः सा ॥ अभिख्या नामशोभयोरित्यमरः ॥ ८८ ॥

अस्या नाऽतिदूरे ॥ सीतालक्ष्मणबलिमुखबलशरपत्र्यासनादिसंयुक्तः॥मरुदुद्भवसुखदोऽसावारामो रामइव भाति॥ ८९ ॥

तत्सन्निधावारामं दृष्ट्वा तं वर्णयति ॥ अस्याइति ॥ अस्याः पुर्या नाऽतिदूरे निकटे ॥ सीतेति ॥ असावारामः उपवनं रामइव दाशरथिरिव भाति ॥ कीदृश आरामो रामश्च ॥ सीतेत्यादि ॥ सीता लांगलपद्धतिरित्यमरात् सीता लांगलपद्धतिः लक्ष्मणाः सारसाः॥ लक्ष्मणश्चैव सारसइत्यमरमाला ॥ बलिमुखा वानरास्तेषां बलं सैन्यं संघइतियावत् यद्वा बवयो रलयोश्चैकत्वस्मरणात् वलिमुखवरा वानरश्रेष्ठाः शरपत्रिणो जलपक्षिणः ॥ शरस्तेजनके बाणे दध्यग्रे ना शरं जले इतिमेदिनी ॥ पतत्रिपत्रिपतगेत्यमरः ॥ यद्वा शरं जलं तेन वाप्यादयोलक्ष्यंते पत्रिणः सामान्यपक्षिणः ॥ असनशब्दात् स्वार्थे प्रज्ञाद्यण् ॥ आसना वृक्षविशेषाः एतेषां द्वंद्वे एते आदयोयेषां तैः संयुक्तः ॥ आदिशब्देन लतादिसंग्रहः ॥ पक्षे सीताजानकी लक्ष्मणः सौमित्रिः बलिमुखबलंवानरसैन्यं तेषुयेवराहनूमदादयोवा शराबाणाः पत्रिणोबाणा अस्यंतेक्षिप्यंतेऽनेनेति पत्र्यासनं कार्मुकं आदिना खड्गादिग्रहणं तैः संयुक्तः ॥ तथा॥

मरुदिति ॥ मरुतोवायोर्यउद्भवः प्रादुर्भावस्तेन सुखदः मांद्यशै-
त्यसौगंध्याऽऽख्यैर्गुणैर्युक्तेन वायुना सुखदातेत्यर्थः ॥ पक्षे मरु-
द्भवो हनुमान् तस्य सुखदाता ॥ पथ्यार्या वृत्तं ॥ ८९ ॥

तस्मिन् किल॥ सर्वतोमुखनिर्लिपकोल्लसत्पुष्करो
त्करवती सुवापिका॥ पद्मनाभमभिवीक्ष्य साश्रि
यं मत्सरादिव निदर्शयत्यहो॥ ९०॥

तस्मिन्किलेति ॥ उत्तरश्लोकान्वयि ॥ सर्वतइति ॥ तस्मिन्नारामे किल सा सुवापिका शोभना वापी पद्मनाभं पद्मं नाभौ यस्य तं श्रीकृष्णं ॥ अच्प्रत्यन्ववेत्यत्राऽजिति योगविभागादच् समासांतः ॥ अभिवीक्ष्य मत्सरादिव श्रियं स्वशोभां नितरां दर्शयति ॥ अहो आश्चर्यं ॥ कीदृशी सुवापिका ॥ सर्वतोमुखेति ॥ पुष्करं सर्वतोमुखमित्यमरात् सर्वतोमुखं जलं निर्लिपाएव निर्लिपका भ्रमराश्च तैरुल्लसंति शोभमानानि यानि पुष्कराणि कमलानि तेषां य उत्करः समूहस्तद्वती ॥ त्वदीया नाभिवापी सर्वतश्चतस्रषु दिक्षु मुखानि यस्यैवंविधो योनिर्लिपो देवस्तेन सर्वतोमुखनिर्लिपकेन ब्रह्मणोल्लसदेकपुष्करवती अहं तु तथाविधाऽनेकपुष्करवतीति मदये कात्वन्नाभिवापीति मत्सरपूर्वकं आरामस्था वापी स्वशोभां दर्शयतीति भावः ॥ रथोद्धत्ता वृत्तं ॥ रोनराविह रथोद्धतालगाविति तल्लक्षणात् ॥ ९० ॥

उद्यानभूमिमभितः क्रकचच्छदपंक्तिरत्र भात्येवं

दृग्दोषशत्रुमिव वै छेत्तुं क्रकचालिरीशनिहिते
यम् ॥ ९१ ॥

उद्यानेति ॥ उद्यानभूमिं अभितः आसमंताद्भागे ॥ अभितः परित इति द्वितीया ॥ क्रकचेति ॥ क्रकचः काष्ठपाटनार्थं सकंटकं शस्त्रं तद्वच्छदाः पत्राणि येषां ते क्रकचच्छदाः केतकवृक्षास्तेषां पंक्तिरेवं भाति ॥ एवं कथं ॥ अत्र रम्यतरोपवने दृग्दोष एव शत्रुस्तं छेत्तुं ईशनिहिता ईश्वरस्थापिता क्रकचाऽऽलिः करपत्रपंक्तिरिव वै निश्चये क्रकचोऽस्त्री करपत्रमित्यमरः ॥ ९१ ॥

ततः॥अर्जुनगुप्तं द्रुपदैः पत्रिकुलैः संकुलं पुरप्रांतं॥
सुख्यन्मरुत्समुदयं त्वनुभूयाऽऽह प्रभू रिपोर्मंदम्॥
॥ ९२ ॥

ततइति ॥ बलदेवभाषणानंतरं ॥ अर्जुनेति ॥ प्रभुः श्रीकृष्णः रिपोः कंसस्य पुरप्रांतं अनुभूय अनुभवविषयं कृत्वा अवलोक्येत्यर्थः ॥ सुख्यन् सुख्यतीतिसुख्यन् सुखमनुभवन् सन् ॥ सुखधातोः कंड्वादियगंताच्छतृप्रत्ययः ॥ मंदं मृदु यथा स्यात्तथा प्राह ॥ मंदोऽतीक्ष्णे च मूर्खे चेतिमेदिनी ॥ ननु शत्रुपुरदर्शनेन सुखं कथमित्याशंक्य श्लिष्टानि सुखे हेतुगर्भाणि पुरप्रांतस्य विशेषणान्याह॥ अर्जुनगुप्तमित्यादि ॥ अर्जुनैर्वृक्षविशेषैर्गुप्तं रक्षितं वेष्टितमिति यावत् ॥ अथच अर्जुनेन कौंतेयेन गुप्तं ॥ तथा ॥ द्रुपदैः द्रूणां वृक्षाणां पदैर्मूलैः पत्रिकुलैः पक्षिसंघैः संकुलं व्याप्तं अथच द्रुपदैः उपलक्षणतया पांचालैः पत्रिकुलैर्बाणसमूहैः तथा मरुतः वायोः

सम्यगुदयोयस्मिंस्तंतथाविधं अथच मरुतो वायोः सकाशात्स- म्यगुदय उत्पत्तिर्यस्यैवंविधो भीमःसोस्यस्मिन्निति ॥ अर्श आ- द्यच् ॥ भीमसेनयुक्तमित्यर्थः ॥ ९२ ॥

छायोदरप्रवेशान्मंदत्वं युक्तमस्य मरुतो द्रोः॥ मोदैस्तथाप्यमंदः शीतकरो मंगलःशुचितया यु क्॥ ९३॥

तदाह ॥ छायेति ॥ अस्य मरुतो वायोः द्रोर्वृक्षस्य छायाया अ- नातपस्य यदुदरं तस्मिन् प्रवेशात् हेतुभूतात् मंदत्वं वृक्षबाहु- ल्येन वेगनिरोधादिति भावः ॥ अथच छायायाः सूर्यपत्न्या उद- रप्रवेशान्मंदत्वं शनित्वं युक्तं योग्यं अस्ति ॥ शनिर्मंदः पगुकाय- श्छायापुत्रो रवेः सुतइति छाया सूर्यप्रिया कांतिः प्रतिबिंबमना- तप इति चामरः ॥ तथापि छायोदरप्रविष्टत्वेन मंदत्वेऽपि मोदैः सुगंधैरमंदः मंदो न भवतीत्यमंदो मंदेतरइत्यर्थः ॥ तथा शीतकर- श्चंद्रः तथा मंगलोभौमः तथा शुचितया शुचिशब्देनसितस्तेन च शुक्रस्तस्य भावः शुचिता तया युक् युक्तः शुक्र इत्यर्थ इति विरोधाऽऽभासः॥सितशब्दस्य शुक्रपर्यायत्वं ज्योतिःशास्त्रे प्रसिद्धं॥ परिहारस्तु अमंदः अनल्पः परिपूर्ण इतियावत् ॥ शीतस्य शै- त्यस्य करः कर्ता ॥ मंगलः शुभः ॥ शुचितया शुद्धत्वेन युक् यु- क्तः निर्दोषइत्यर्थइति ॥ ९३ ॥

ततोऽक्रूरं क्रूरक्रव्यादचक्रकृंतनश्चक्रपाणिरेवम भाणीत्॥ प०॥ आर्य प्रयाहि सदनं कदनं विधाय

त्वेष्याम उद्धतखलस्य खलु त्वदीयम्॥ तस्माद्वयं तु पुरतः सुरथेन शीघ्रमार्याऽन्विताश्चपलकर्कचतु ष्टयेन॥ ९४॥

ततइति ॥ ततः पुरशोभाऽवलोकनाऽनंतरं ॥ क्रूरेति ॥ क्रूरा येक्र- व्यादा राक्षसास्तेषां यच्चक्रं तस्य कृंतनश्छेदकोनाशयितेति या- वत् एवंविधश्चक्रपाणिः श्रीकृष्णः अक्रूरंप्रति एवं वक्ष्यमाणप्र- कारेणाऽभाणीदुक्तवान् ॥ तदाह ॥ आर्येति ॥ हे आर्य अक्रूर हि यस्मात् वयं तु पुरतः प्रथमं उद्धतश्चाऽसौ खलश्चोद्धतखल- स्तस्य कंसस्य कदनं नाशं विधाय आर्यान्विताः आर्येण बलदे- वेनाऽन्विता युक्ताः संतस्त्वदीयं सदनं गृहं प्रतिएष्याम आगमि- ष्यामः ॥ खलु निश्चये ॥ तस्माद्धेतोः त्वं च॥ चपलेति ॥ अश्वप- र्यायेषु सितः कर्क इत्यमरात् चपलः पारदे इत्युपक्रम्य नपुंसकं तु शीघ्रे स्यादिति मेदिन्युक्तेश्च चपलं शीघ्रं वेगवदिति यावत् ए- वंविधं कर्काणां शुक्लाऽश्वानां चतुष्टयं यस्मिन् स तथाविधेन सु- रथेन शीघ्रं सदनं स्वगृहं प्रयाहि ॥ वसंततिलका वृत्तं ॥ ९४ ॥

इत्थं स तदनुज्ञातः ॥ हयजवपवनाऽऽकंपितकेत नपटसखमयं वहँश्चित्तम्॥ रथ इव तेऽपि मनो रथ इति कंसं सूचयन् विवेश पुरीम्॥ ९५॥

अथाऽक्रूरस्य वेगेन पुरप्रवेशमुत्प्रेक्षापूर्वकं वर्णयति ॥ इत्थमिति॥ उत्तरत्राऽन्वयः ॥ हयेति ॥ इत्थं पूर्वोक्तप्रकारेण तदनुज्ञातः कृ- ष्णाऽनुज्ञया सोऽयं अक्रूरः कंसं प्रति इति सूचयन् सन् पुरीं म-

थुरां प्रति विवेश प्रविष्टः॥ इतीति किं॥ हे कंसेति शेषः॥ ते मनोरथोऽपि रथइव इदानीं मदानीतस्यंदनइवेति॥अयं रथो यथा केनाऽप्यनधिष्ठितत्वाच्छून्यः ते मनोरथोऽपि अत्राऽऽनीय कृष्णं हनिष्यामीत्येवंरूपोऽपि तथा शून्यइत्यर्थः॥अत्र कंसं सूचयन्नित्यत्र कं संसूचयन्निति पदविभागेन प्रश्ने सति कंसं प्रतीति उत्तरमिति प्रश्नोत्तरभावोऽप्येकेन पदेनैवेति चमत्कारोऽपि बोद्ध्यः॥ किं कुर्वन्॥ हयजवेति॥ हयानां जवेन वेगेन यः पवनो वायुस्तेन आकंपितो यः केतनपटो ध्वजांऽशुकं तस्य सखिभूतं सदृशं चित्तं वहन्॥ रथवेगवशात् परावृत्तं ध्वजांऽशुकमिव परावृत्य कृष्णाऽभिमुखीभवत् अथवा यदि पुरं गच्छामि तर्हि कृष्णवियोगो भवेत् यदि न गच्छामि तर्ह्याज्ञाभंगो भवेदिति इतस्ततश्चलितमंतःकरणं वहन्निति भावः॥ ९५॥

अथ॥ बाल्ये रागवती सा प्राची नेत्याकलय्य नन्वधुना॥ मित्र स्ससर्प शीघ्रं नव्यां तत्संमुखीं दिशं रागात्॥ ९६॥

अथ कदा प्रविवेशेत्याकांक्षायां मथुरामनयद्रामं कृष्णं चैवदिनात्ययइति श्रीमद्भागवतोक्त्या सायंकाले इति निर्णयेन तं समयं वर्णयति॥ अथेति॥ अर्थांतरोपक्रमे अथशब्दः॥ बाल्येइति॥ मित्रः सूर्यः शीघ्रं रागात् प्रेमतः तत्संमुखीं प्राचीसंमुखीं नव्यां दिशं पश्चिमां प्रति ससर्प गच्छति स्म॥ किंकृत्वेव॥ सा प्रसिद्धा प्राची बाल्ये बाल्यावस्थायामेव रागवती रागो रक्तिमा प्रीतिश्च तद्वती आसीत् अधुना वृद्धावस्थायां अथच अस्तंगमनावस्थायां नेत्याकलय्य ज्ञात्वा॥ ननु संभावनायां॥ ९६॥

तदानीं प्रविश्य॥ क्षीराऽब्धिनिर्मथनजैरिव फेनकूटै स्सौधै स्सुधाकरदृषत्प्रचुरैः प्रदृद्याम्॥ दृष्ट्वा पुरीं धुरि हरिः करिचंक्रमोऽपि चक्रे मतिं स ननु चंक्रमितुं हि तस्याम्॥ ९७॥

॥ इतिश्रीबालकृष्णचंपूप्रबंधे पंचमःस्तबकःसमाप्तः॥

एवंच परममंगलरूपत्वात्सायं गोधूलमुहूर्तवेलायां श्रीकृष्णो मथुरां प्रविवेशेत्याह॥ तदानीमिति॥ तदानीं सायंकाले॥ प्रविश्येत्यनयोरुत्तरश्लोकेऽन्वयः॥ ननु सायंकाले प्रवेशकथनमयुक्तं॥ अथाऽपराण्हे भगवान् कृष्णः संकर्षणान्वितः॥ मथुरां प्राविशद्गोपैर्दिदृक्षुः परिवारितइत्युत्तरत्राऽपराण्हे मथुराप्रवेशकथनेन अग्रे च तयोर्विचरतोः स्वैरमादित्योऽस्तमुपेयिवानिति कथनेन च विरोधात्॥ नच प्रथमं मथुरामनयदित्यनेन सायंप्रवेशकथनादथाऽपराण्हइति वाक्ये अपराण्हशब्देन प्रवेशदिनोत्तरदिनस्थाऽपराण्हो ग्राह्यः उत्तरत्राऽऽदित्योऽस्तमुपेयिवानित्यत्राऽपि तथेति न विरोध इतिवाच्यं॥ केशिवधाऽनंतरं भाविकर्मभिः स्तवनवेलायां चाणूरं मुष्टिकं चैव मल्लानन्यांश्च हस्तिनं॥ कंसं च निहतं द्रक्ष्ये परश्वोऽहनि ते विभो इति नारदवाक्ये परश्व इत्युक्त्या द्वादश्यां प्रातः केशिवधानंतरं नारदाऽऽगमनं ततो व्योमहननं ततः सायमक्रूरागमनं द्वितीयदिने चाऽक्रूरेण सह कृष्णस्य मथुरागमनं तस्मिन्नेवाऩ्हि अपराण्हे मथुराप्रवेशपूर्वकधनुर्भंगादिकरणपूर्वकं विचरतः सायं शकटस्थानाऽऽगमनमित्येवं क्रमोपलं-

भात् ॥ एवमेव श्रीधरस्वामिभिः स्पष्टतया व्याख्यातत्वाच्च तथा वक्तुमशक्यत्वात् ॥ अतएव पूर्वं नारदवाक्यश्रवणानंतरं आरभ्यतां धनुर्यागश्चतुर्दश्यां यथाविधीति कंसाज्ञाकरणं उत्तरत्र च धनुर्भंगादिश्रवणाऽनंतरं प्रजागरकथनं व्युष्टायां निशीत्यादिना मल्लरंगादिप्रसाधनकथनं चोपपद्यते तस्मात्पूर्वापरविरोधस्तदवस्थएवेतिचेन्न॥सायं गोधूलमुहूर्ते प्रवेशाऽनंतरमपि मथुराऽवलोकनरंगकारादिशिक्षणमालाकारानुग्रह कुब्जामेलन धनुर्भंगादिकार्याणामवश्यकरणीयत्वात् तदनुरोधेन भगवदिच्छया तस्मिन्नेवाऽन्हि परावृत्य अपराण्हसद्भावोपीति न विरोधः॥अथवा दिनाऽत्ययइत्यस्याऽवतरति दिवसे मध्यान्हानंतरमित्यर्थः॥अतएव मध्यान्हानंतरं अवतीर्णो दिवस इति लोका वदंति ॥ अतएव चाऽस्तगे रवावित्यनुक्त्वा दिनाऽत्ययइत्युक्तं ॥ दिनस्याऽत्यये अतिक्रमे इत्यर्थः ॥ अत्ययोऽतिक्रमे कृच्छ्रे इत्यमरात् ॥ एवंच न विरोधः ॥ स्पष्टं चैतत्सर्वं सुबोधिन्यां प्रतिपादितं श्रीमद्वल्लभाचार्यैः ॥ द्वितीये पक्षे प्रकृतश्लोकस्थस्य ससर्पेत्यस्य गंतुमुद्यतोऽभूदित्यर्थः कर्त्तव्य इति दिक् ॥ क्षीरेति॥ तदानीं मथुरामितिशेषः प्रविश्य सः प्रसिद्धः करिचंक्रमोऽपि करिवद्गजवच्चंक्रमो गतिर्यस्यैवंविधोऽपि हरिः सिंहः अश्वो वा इति विरोधाऽऽभासः ॥ परिहारस्तु हरिः श्रीकृष्णः यमाऽनिलेंद्रचंद्राऽर्कविष्णुसिंहांऽशुवाजिषु ॥ शुकाऽहिकपिभेकेषु हरिर्नाकापिले त्रिषु इत्यमरः ॥ धुरि अग्रे पुरीं मथुरां दृष्ट्वा तस्यां पुर्यां चंक्रमितुं गमनं कर्तुं मतिं बुद्धिं चक्रे ॥ ननु निश्चये ॥ कीदृशीं पुरीं ॥ सौधैः राजगृहैः ॥ क्षीरेति ॥ क्षीराब्धेः क्षीरसमुद्रस्य यन्निर्मथनं तस्माज्जातैः फेनकूटैरिव॥ अतिधवलैरित्यर्थः ॥

सुधेति ॥ सुधाकरदृषदश्चंद्रकांताः प्रचुराः प्रभूता येषु तैस्तथाविधैः प्रकर्षेण हृद्यां रम्यां ॥ १७ ॥

॥ इति श्रीबालकृष्णचंपूव्याख्यायां ॥

पंचमःस्तबकः ॥ ५ ॥

षष्ठः स्तबकः प्रारभ्यते

श्रीः ॥ ग० ॥ अथ स विविधांऽवरमाल्याऽऽभरणपरिष्कृतैर्विजृंभिताऽऽमोदद्वयपरिकलितैः परित्यक्तसुखदगोपतिगोगणव्यापारैरपि सुखदगोपतिगोनिश्चयाऽभिमृष्टविग्रहैः श्रितकृष्णवर्त्मभिरपि तदवलोकनशीतलनयनहृदयैः सशेषैरप्यशेषैर्गोपडिंभैः परिपूरितप्रांतभागः सानुरागः सौधाऽट्टालहर्म्याऽग्रसमारूढाभिः समुत्सृष्टसदनव्यवसायाभिरपि समदनं तद्वदनदर्शने सव्यवसायाभिः समुदितपर्युत्सुकतया वसनाऽऽकल्पांऽजनादिरचनाप्रगल्भाभिरपि रसरीतिप्रगल्भाभिर्यदुपुरसुंदरीभिः सस्मितेक्षणादिभिरंचितस्तत्रत्याऽनल्पशिल्पकल्पितदृष्टिरखिलसत्पौरजनेषु कृतकृपेक्षणसुधावृष्टिः शनैःशनै राजपथमवजगाहे ॥ १ ॥